# मङ्गलम्

(उपनिषदः सङ्गृहीताः शान्तिमन्त्राः)

**ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।**

**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।।**

**ॐ शान्तिः । शान्तिः । शान्तिः ।।**

ಓಂಕಾರ ರೂಪದಲ್ಲಿ ಯಾವುದು ಅಭಿವ್ಯಕ್ತಗೊಳ್ಳುತ್ತದೆಯೋ ಅದು, ಆ ಪರಬ್ರಹ್ಮವು , ಎಲ್ಲ ಪ್ರಕಾರಗಳಿಂದಲೂ ಪೂರ್ಣವಾದುದು. ಈ ಸೃಷ್ಟಿಯೂ ಸಂಪೂರ್ಣವಾದುದು. ಆ ಪೂರ್ಣತತ್ತ್ವದಿಂದ (ಪರಬ್ರಹ್ಮನಿಂದ) ಈ ಪೂರ್ಣವನ್ನು (ಸೃಷ್ಟಿಯನ್ನು) ಹೊರತೆಗೆದರೂ, ಪೂರ್ಣವೇ ಶೇಷವಾಗಿ ಉಳಿಯುತ್ತದೆ.

That (Supreme Brahman) is infinite and this (conditioned Brahman) is infinite. The infinite proceeds from the infinite (Supreme Brahman). Realizing the infinite (through knowledge), of the infinite (conditioned Brahman), It (unconditioned Brahman) remains as the infinite.

**भद्रं कर्णेभिः श्रुणुयाम देवाः**

**भद्रं पश्येमाक्षभिर्यजत्राः ।**

**स्थिरैरङ्गैस्तुष्टुवाँ सस्तनूभिः**

**व्यशेम देवहितं यदायुः ।।**

**ॐ शान्तिः। शान्तिः। शान्तिः।।**

ಹೇ ದೇವತೆಗಳೆ, ನಾವು ಯಾವಾಗಲೂ ನಮ್ಮ ಕಿವಿಗಳಿಂದ ಮಂಗಳವಚನಗಳನ್ನೇ ಕೇಳುವಂತಾಗಲಿ. ಯಾಗಾಚರಣೆಯಲ್ಲಿ ನಮ್ಮ ಕಣ್ಣುಗಳಿಂದ ಒಳ್ಳೆಯ ದೃಶ್ಯಗಳನ್ನೇ ನೋಡುವಂತಾಗಲಿ. ನಾವು ಸದೃಢಾಂಗಯುತ ದೇಹಿಗಳಾಗಿ, ನಮ್ಮ ಜೀವನ ಪರ್ಯಂತವೂ, ದೇವಹಿತವನ್ನೇ ಆಚರಿಸೋಣ.

O gods, may we hear auspicious words with the ears; while engaged in sacrifices, may we see auspicious things with the eyes;

while praising (the gods) with steady limbs, may we enjoy a life that is beneficial to gods.

**स्वस्ति न इन्द्रो वृद्धश्रवाः**
**स्वस्ति नः पूषा विश्ववेदाः ।**
**स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः**
**स्वस्ति नो बृहस्पतिर्दधातु ।।**
**ॐ शान्तिः। शान्तिः। शान्तिः।।**

ಜ್ಞಾನಿಗಳ ಮಾತನ್ನು ಕೇಳುವ ಇಂದ್ರದೇವನು ನಮಗೆ ಮಂಗಳವನ್ನುಂಟುಮಾಡಲಿ. ಪೂಷನ್ (ಸೂರ್ಯ) ದೇವನು ನಮಗೆ ಕಲ್ಯಾಣಕಾರಕನಾಗಲಿ. ಅರಿಷ್ಟನಾಶಕನಾದ ಗರುಡದೇವನು ನಮಗೆ ಮಂಗಳಕರನಾಗಲಿ. ಬೃಹಸ್ಪತಿದೇವನು ನಮಗೆ ಒಳ್ಳೆಯದನ್ನು ನೀಡುವಂತಹವನಾಗಲಿ.

May Indra who listens to the learned be auspicious to us; may the supremely rich (all knowing) Pusan (the sungod) be propitious to us; May Garuda, the destroyer of the evil, be well-disposed towards us; may Brihaspati ensure our welfare.

✻ ✻ ✻

# १. द्वे विद्ये वेदितव्ये

(मुण्डकोपनिषत् - प्रथमखण्डः)

## पीठिका

ऋग्वेदः, यजुर्वेदः सामवेदः, अथर्ववेदश्चेति प्रसिद्धाः चत्वारो वेदाः । प्रत्येकस्मिन्नपि वेदे संहिता-ब्राह्मणम्-आरण्यकम्-उपनिषदिति चत्वारो विभागाः सन्ति । वेदानाम् अन्ते विद्यमानत्वात् उपनिषदां **'वेदान्त'** इत्यपि नाम वर्तते । उपनिषत् शब्दः उप, नि इति उपसर्गद्वयपूर्वकात् विशरणगत्यवसादनार्थक सद् धातोः क्विप् प्रत्यययोगेन निष्पन्नः। तदर्थस्तु समीपस्थाय शिष्याय गुरुणा बोध्यमाना अध्यात्मविद्या इति । उपलभ्यमानासु शताधिकोपनिषत्सु ईशादि दशउपनिषदः प्रसिद्धाः । तासु मुण्डकोपनिषत् अन्यतमा ।

प्रकृतः 'द्वे विद्ये वेदितव्ये' इति पाठः अथर्ववेद-अन्तर्गतायाः मुण्डकोपनिषदः प्रथमखण्डात् सङ्गृहीतः । अस्मिन् पाठे शौनकः इति गृहस्थः अध्यात्मविद्यां प्राप्तुम् अङ्गिरसः समीपं गत्वा विद्याविषयकं प्रश्नं च पृच्छति । गुरुः तस्मै अक्षरम् (ब्रह्म) उपदिशति । विश्वमिदम् अक्षरात् सम्भवतीति प्रतिपादयति।

**ॐ ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता ।**
**स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह ।। १ ।।**

**अथर्वणे यां प्रवदेत ब्रह्माऽथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम् ।**
**स भारद्वाजाय सत्यवहाय प्राह भारद्वाजोऽङ्गिरसे परावराम् ।। २ ।।**

**शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ ।**
**कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ।। ३ ।।**

**तस्मै स होवाच । द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति**
**परा चैवापरा च ।। ४ ।।**

**तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं**
**निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते ।।५।।**

यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम् ।
नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः ।। ६ ।।

यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति ।
यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात् सम्भवतीह विश्वम् ।।७।। ।।इति ।।

## शब्दार्थः टिप्पणी

**ब्रह्मा -** महान् धर्मज्ञानवैराग्यैश्वर्यस्वरूपः । सर्वान् अतिशेते - ಎಲ್ಲವನ್ನೂ ಮೀರಿಸುವವನು, ಧರ್ಮ, ಜ್ಞಾನ, ವೈರಾಗ್ಯ, ಐಶ್ವರ್ಯ ಸ್ವರೂಪನು - One who is above all, surpassing, great, i.e. One who excels all others in virtue, knowledge , detachment and splendour.

**देवानां प्रथमः -** इन्द्रादीनां प्रथमः - ಇಂದ್ರಾದಿಗಳಲ್ಲಿ ಮೊದಲಿಗನು - One who is foremost among Lord Indra and others.

**सम्बभूव -** अभिव्यक्तः - ಸಮಗ್ರವಾಗಿ ಅಭಿವ್ಯಕ್ತಗೊಂಡವನು, ಪ್ರಾಪಂಚಿಕ ಜೀವಿಗಳಂತೆ ಧರ್ಮಾಧರ್ಮಗಳ ಪ್ರವೃತ್ತಿಯಿಂದ ಜನಿಸಿದವನಲ್ಲ -became perfectly manifest, He was self born, unlike other worldly creatures who take birth under the impulsion of virtue and vice.

**विश्वस्य कर्ता -** ಈ ಪ್ರಪಂಚದ ಸೃಷ್ಟಿಕರ್ತ - the creator of the whole universe.

**भुवनस्य गोप्ता -** उत्पन्नस्य पालयिता - ಸೃಷ್ಟಿಸಿದ ಪ್ರಪಂಚವನ್ನು ರಕ್ಷಿಸುವವನು - the creator and protector of the world.

**ब्रह्मविद्या -** परमात्मविद्या - ಬ್ರಹ್ಮವಿದ್ಯೆ ಅಥವಾ ಬ್ರಹ್ಮಜ್ಞಾನ, ಪರಮಜ್ಞಾನ, ಬ್ರಹ್ಮನಿಂದ ಬೋಧಿಸಲ್ಪಟ್ಟ ಕಾರಣ ಇದು ಬ್ರಹ್ಮವಿದ್ಯೆ, - the knowledge of Brahman, the Supreme Self . It is called Brahmavidya because the knowledge is imparted by Brahma.

**सर्वविद्या प्रतिष्ठाम् -** सर्वविद्याश्रयाम् - ಎಲ್ಲಾ ವಿದ್ಯಾ ಪ್ರಕಾರಗಳಿಗೂ ಆಧಾರವಾದ, ಎಲ್ಲ ವಿಧದ ಜ್ಞಾನಕ್ಕೆ ಆಲಂಬನವಾದ - the basis of all knowledge, or that which is the support of all kinds of knowledge.

**ज्येष्ठपुत्राय -** (अथर्वः प्रथमं सृष्टः) अथर्वाय - ಅಥರ್ವನನ್ನು ಮೊದಲು ಸೃಷ್ಟಿಸಿದ ಕಾರಣ ಅಥರ್ವನು ಜ್ಯೇಷ್ಠಪುತ್ರನು. (ಅಥರ್ವನು ಹಿರಿಯ ಮಗನು, ಮೊದಲು ಸೃಷ್ಟನಾದವನು . ಬ್ರಹ್ಮನ ಅನೇಕ ಸೃಷ್ಟಿ ಕ್ರಮಗಳ ಪ್ರಾರಂಭದ ಒಂದು ಸೃಷ್ಟಿಯಲ್ಲಿ ಜನಿಸಿದ ಕಾರಣ ಅವನು ಜ್ಯೇಷ್ಠನು) - to Atharva His eldest son for (He is the eldest and he is also one among the sons of Brahma. Atharva is the eldest as he was born at the beginning of one of the many cycles of Brahama's creation).

ज्येष्ठश्चासौ पुत्रश्च तस्मै (कर्मधारय समासः) ।

**परावरा -** परस्मात् अवरेण प्राप्ता - ಪರಂಪರಾಗತವಾಗಿ ಗುರುವಿನಿಂದ ಶಿಷ್ಯನಿಗೆ ಬಂದಂತಹ ಜ್ಞಾನ ಎಂದರೆ ಗುರು-ಶಿಷ್ಯ ಪರಂಪರೆಯ ಮೂಲಕ ಒಂದು ಪೀಳಿಗೆಯಿಂದ ಮತ್ತೊಂದು ಪೀಳಿಗೆಗೆ ಹರಿದು ಬಂದ ಜ್ಞಾನ. ಅಥವಾ ಗುರು-ಶಿಷ್ಯರ ವ್ಯಾಪ್ತಿಯಲ್ಲಿ ಸೇರಿದ ಎಲ್ಲ ವಿಷಯಗಳನ್ನೂ ಒಳಗೊಂಡ ಕಾರಣ ಅದಕ್ಕೆ 'ಪರಾವರಾ' ಎಂದು ಹೆಸರು - the knowledge that had been received from the higher and by the lower in succession, i.e. it ran through a line of masters and disciples ಪರಂಪರಾಗತವಾಗಿ ಪ್ರಾಪ್ತವಾದ- (ವರರೂಪದಿಂದ ಪಡೆಯದ) it is so called because it embraces all things that come with in the scope of the higher or lower knowledge.

**तां विद्याम् -** ब्रह्मणः प्राप्तां परमात्मविद्याम् --- अथर्वा अङ्गिरे उक्तवान्, सः अङ्गीः सत्यवहाय भारद्वाजाय प्रोक्तवान् । भारद्वाजः परम्परागतां विद्यां अङ्गिरसे उक्तवान् । तम् अङ्गिरसं शौनकः पृष्टवान् इति । - ಬ್ರಹ್ಮನಿಂದ ಪ್ರಾಪ್ತವಾದ ಪರಮಾತ್ಮ ವಿದ್ಯೆಯನ್ನು ಅಥರ್ವನು ಅಂಗಿರನಿಗೆ ಹೇಳಿದನು, ಆ ಅಂಗಿರನು ಸತ್ಯವಹನಾದ ಭಾರದ್ವಾಜನಿಗೆ, ಅನಂತರ ಭಾರದ್ವಾಜನು ಪರಂಪರಾನುಗತವಾಗಿ ಬಂದ ವಿದ್ಯೆಯನ್ನು ಅಂಗಿರಸನಿಗೆ ಹೇಳಿದನು. ಆ ಅಂಗಿರಸನನ್ನು ಶೌನಕನು ಪ್ರಶ್ನಿಸಿದನು - The supreme knowledge that was imparted by Brahama -- was imparted to Angir from Atharva, from Angir to Satyavaha Bharadwaja, from Bharadwaja to Angirasa. Shaunaka questioned that Angirasa.

**विधिवत् -** यथाशास्त्रं, शिष्यो भूत्वा - ಶಾಸ್ತ್ರಗಳಿಗನುಗುಣವಾಗಿ, ಶಿಷ್ಯನಾಗಿ - having become the disciple in accordance with the scriptures,

**परा** -परमात्मविद्या - ಶ್ರೇಷ್ಠ, ಪರಮಾತ್ಮ ವಿದ್ಯೆ - the higher, the knowledge of Supreme Self.

**अपरा** - धर्माधर्मसाधनतत्फलविषया ऋगादि:- ಧರ್ಮಾಧರ್ಮಗಳ ಜ್ಞಾನ, ಅವುಗಳ ಸಾಧನೆ ಮತ್ತು ಪರಿಣಾಮ - the knowledge of virtue and vice and their means and ends.

**अद्रेश्यम्** - अदृश्यम् - बुद्धीन्द्रियाणाम् अतीतम् - ಪ್ರತ್ಯಕ್ಷವಲ್ಲದುದು ಎಂದರೆ ಎಲ್ಲ ಜ್ಞಾನೇಂದ್ರಿಯಗಳ ಪರಿಽಯನ್ನು ಮೀರಿದುದು - not perceptible i.e. beyond the range of all the sense organs.

**अग्राह्यम्** - कर्मेन्द्रिय - अविषयम् - ಗ್ರಹಿಸಲು ಅಸಾಧ್ಯವಾದುದು, ಕರ್ಮೇಂದ್ರಿಯಗಳ ಪರಿಽಯ ಹೊರಗೆ ಉಳಿದಂತಹುದು - beyond one's grasp, i.e. beyond the range of the organs of action.

**अगोत्रम्** - अनन्वयम् - ಗೋತ್ರವೆಂಬುದು ವಂಶಾನ್ವಯ ಅಥವಾ ಮೂಲದೊಡನೆ ಸಂಬಂಧಪಟ್ಟುದು. ಅಗೋತ್ರವೆಂದರೆ ಸಂಬಂಧ ಹೊಂದಲು ಯಾವುದೇ ಮೂಲವಿಲ್ಲದ ಎಂದರ್ಥ - gotra is synonymous with connection or root agotram means unconnected for it has no root with which it can get connected.

**अवर्णम्** - अविद्यमानाः वर्णाः यस्य तत् (बहुव्रीहिसमासः) द्रव्यधर्मादि ( शुक्लत्वादि)रहितम् - ದ್ರವ್ಯಧರ್ಮಗಳಾದ ಬಿಳಿ ಕಪ್ಪು, ಮುಂತಾದಬಣ್ಣಗಳಿಂದರಹಿತವಾದ - That Imperishable which is devoid of Colours, i.e. featureless.

**अपाणिपादम्** - कर्मेन्द्रियरहितम् - ಹಸ್ತಪಾದಗಳಿಲ್ಲದುದು, ಎಂದರೆ ಕರ್ಮೇಂದ್ರಿಯ ರಹಿತವಾದುದು - without hands and feet, that is to say, devoid of all organs of action.

**अव्ययम्** - न व्येति इति अव्ययम् - ಹ್ರಾಸ (ಕ್ಷಯ)ವಿಲ್ಲದುದು, ತಾನು ಮೊದಲಿದ್ದ ರೂಪದಿಂದ ಬದಲಾಗದಂತಹುದು - undiminishing, one that does not change from its original form.

**भूतयोनिः** - पृथिव्यादि भूतानां कारणम् - ಎಲ್ಲ ವಿಧದ ಸೃಷ್ಟಿಗೆ ಮೂಲವಾದುದು. ಭೂಮಿಯು ಎಲ್ಲಾ ಚರಾಚರ ವಸ್ತುಗಳಿಗೆ ಕಾರಣವಾದಂತೆ ಪಂಚಭೂತಗಳ ಸೃಷ್ಟಿಗೆ ಕಾರಣ - the source of all

creation, of just as the five great elements, as earth is of all moving and nonmoving things.

**धीराः** - विवेकिनः - ಯುಕ್ತಾಯುಕ್ತಜ್ಞಾನ ವಿವೇಕವುಳ್ಳವರು - those who have the power of discrimination.

**परिपश्यन्ति** - सर्वत्र आत्मभूतम् - ಎಲ್ಲೆಡೆಯೂ ಎಲ್ಲರ ಆತ್ಮಭೂತವಾದ ಚೈತನ್ಯರೂಪ ವಸ್ತುವನ್ನು ಕಾಣುವುದು - see every where the self of all.

**पराविद्या** - यया विद्यया अक्षरमधिगम्यते सा - ಯಾವ ವಿದ್ಯೆಯಿಂದ ಪರಮ ಸತ್ಯವನ್ನು (ಅಕ್ಷರವನ್ನು) ತಿಳಿದುಕೊಳ್ಳಬಹುದೋ, ಆ ವಿದ್ಯೆ ಎಂದರ್ಥ - by which the imperishable is attained, indeed the attainment of the highest consists merely in removing ignorance and nothing more.

**ऊर्णनाभिः** - लूताकीटः - ಜೇಡ - spider.

**ओषधयः** - सस्यानि- Plants

**सतः पुरुषात्** - सद्वस्तुनः from an existing being

## अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. द्वे विद्ये के ?
2. भुवनस्य गोप्ता कः ?
3. अङ्गीः कस्मै ब्रह्मविद्यां प्रोक्तवान् ?
4. महाशालः कः ?
5. वेदाङ्गानि कति ?
6. अग्राह्यं किम् ?
7. विश्वं कस्मात् सम्भवति ?

**II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. ब्रह्मविद्यायाः परम्परां लिखत ।
2. अपरायां विद्यायां के अन्तर्भवन्ति ?
3. ब्रह्मणः स्वरूपं वर्णयत ।
4. विश्वस्य उत्पत्तिः कथमिति सोदाहरणं लिखत ।

**III पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत ।**

1. सर्वमिदं विज्ञातं भवतीति ।
2. परा चैवापरा च ।
3. यद्भूतयोनिं परिपश्यन्ति धीराः ।

**IV मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. ब्रह्मा देवानां................सम्बभूव ।
2. सर्वविद्याप्रतिष्ठाम्............ज्येष्ठपुत्राय प्राह ।
3. शौनको ह वै महाशालोऽङ्गिरसं..........उपसन्नः पप्रच्छ ।
4. यथा पृथिव्याम्...............सम्भवन्ति ।

| ओषधयः, प्रथमः, विधिवत्, अर्थवाय |
|---|

**V संयोजयत**

| अ | आ |
|---|---|
| अथर्वा | केशलोमानि |
| पुरुषात् | सुसूक्ष्मम् |
| सत्यवहः | ज्येष्ठपुत्रः |
| अक्षरम् | अपरा |
| शिक्षा | भारद्वाजः |

## — योग्यता विस्तारः —

ॐकारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥

**दशोपनिषदः** - ईशः केनः कठः प्रश्नः मुण्डकः माण्डूक्यम् ऐतरेयः तैत्तिरीयः छान्दोग्यं बृहदारण्यकः चेति ।

गर्भजन्मजरारोगाद्यनर्थपूगं निशातयति, परं ब्रह्म गमयति, अविद्यादिसंसारकारणमत्यन्तं विनाशयति इति वा उपनिषत् । (इति शाङ्करभाष्यम्)

**षडङ्गानि** - **शिक्षा-कल्पः-व्याकरणम्-निरुक्तम्-छन्दः-ज्योतिषम् ।**

**ब्रह्मणः अन्यत् लक्षणम्** - अस्थूलमनणु-अह्रस्वमदीर्घम् ....... (बृहदारण्यकम्)

सत्यं ज्ञानमनन्तं ब्रह्म ....... (तैत्तिरीयोपनिषत्)

पश्यत्यचक्षुः स श्रुणोत्यकर्णः (कठोपनिषत्)

अक्षरं परमं ब्रह्म ....... (भगवद्गीता ८/३)

अस्याम् उपनिषदि विश्वस्य उत्पत्तिः अक्षरात् इति उक्तम् । किं तदक्षरमिति चेत् न क्षरति इत्यक्षरम् । अर्थात् दृश्यमानम् अनुभूयमानञ्चेदं विश्वं सम्भूतं (जातं) इत्युक्तम् भवति । तेन विश्वं कार्यमिति सम्पन्नम् । कारणं विना कार्यं नोत्पद्यते । अतः कार्यरूपस्य प्रपञ्चस्य कारणम् अक्षरं ब्रह्म इति फलितम् । तस्य कारणीभूतस्य ब्रह्मणः स्वरूपम् 'अक्षरम्' शब्देन अभिहितम् । अनेन ब्रह्मणः अविनाशित्वं, वृद्धिह्रासादिद्रव्यधर्मरहितत्वं सत्यत्वं च सूचितम् । एतादृशं ब्रह्म भूतभविष्यद्वर्तमानेषु अबाध्यम् । तत् सत्यम् । तत् यया विद्यया गुरूपदेशपुरस्सरं बोध्यते सा परा विद्या ।

| अङ्गिर् शब्दः पुंलिङ्गः । | | | अङ्गिरस शब्दः पुंलिङ्गः । | | |
|---|---|---|---|---|---|
| अङ्गी: | अङ्गिरौ | अंगिर: | अङ्गिरा : | अङ्गिरसौ | अङ्गिरस : |
| अङ्गिरं | अङ्गिरौ | अंगिर: | अङ्गिरसम् | अङ्गिरसौ | अङ्गिरस: |
| अङ्गिरा | अङ्गीर्भ्याम् | अङ्गीर्भि: | अङ्गिरसा | अङ्गीर्भ्याम् | अङ्गीर्भि : |
| अङ्गिरे | अङ्गीर्भ्याम् | अङ्गीर्भ्य: | अङ्गिरसे | अङ्गीर्भ्याम् | अङ्गीर्भ्य: |
| अङ्गिर: | अङ्गीर्भ्याम् | अङ्गीर्भ्य: | अङ्गिरस: | अङ्गीर्भ्याम् | अङ्गीर्भ्य : |
| अङ्गिर: | अङ्गिरो: | अङ्गिराम् | अङ्गिरस: | अङ्गिरसो: | अङ्गिरसाम् |
| अङ्गिरि | अङ्गिरो: | अङ्गीर्षु | अङ्गिरसि | अङ्गिरसो: | अङ्गिरस्सु |

Revised Edition 2017

**अनुशंसितग्रन्थाः**

1. ईशादिदशोपनिषद:-(शङ्करभाष्ययुता:) मोतिलाल् बनारसिदास ।
2. दशोपनिषद:-(शङ्करभाष्ययुता:) with English translation and commentary-Ramakrishna Math-Seventh Impression-2009.
3. ಶಾಂಕರಭಾಷ್ಯ ಸಹಿತ ದಶೋಪನಿಷತ್ತುಗಳು-ಅಧ್ಯಾತ್ಮ ಪ್ರಕಾಶನ ಕಾರ್ಯಾಲಯ, ಹೊಳೆನರಸೀಪುರ-4ನೇ ಆವೃತ್ತಿ, 1999.

* * *

# २. आदर्शगुणाः

(रामायणम्-बाल-अयोध्या-अरण्यकाण्डाः)

## पीठिका

आदर्शगुणाः इति पद्यभागः आदिकविना वाल्मीकिमहर्षिणा प्रणीतात्-'आदिकाव्यम्' इति प्रसिद्धात् रामायणमहाकाव्यात् उद्धृतः । भागोऽयं बालकाण्ड-अयोध्याकाण्ड-अरण्यकाण्डेभ्यः सङ्गृहीतः । ग्रन्थेऽस्मिन् सप्तकाण्डैः चतुर्विंशतिसहस्रैः श्लोकैश्च श्रीरामस्य चरितं निबद्धमस्ति । रामायणम् इतिहासत्वेनाऽपि प्रसिद्धम् । काव्यमदः जीवनमौल्यानि मानवसम्बन्धसूक्ष्मांश्च कान्तासम्मिततया बोधयति ; तान् गुणान् अनुकर्तुं प्रेरयति च ।

'कोऽन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान् ' इति महर्षिः वाल्मीकिः नारदमहर्षिं पृच्छति । तदा नारदः श्रीरामस्य चरितं कथयति । तदनु वाल्मीकिः स्वीये रामायणे श्रीरामस्य आदर्शगुणान् बहुप्रकारैः वर्णयति । तथा अरण्यकाण्डे राक्षसः मारीचोऽपि रावणस्य सम्मुखे श्रीरामस्य गुणान् कीर्तयति। तेषु केचन श्लोका अत्र सङ्गृहीताः ।

**इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः ।**
**नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी ।। १ ।।**

**बुद्धिमान् नीतिमान् वाग्मी श्रीमान् शत्रुनिबर्हणः ।**
**विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ।। २ ।।**

**धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः ।**
**यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ।। ३ ।।**

**रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ।**
**वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ।। ४ ।।**

**सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिवान् प्रतिभानवान् ।**
**सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ।। ५ ।।**

सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः ।
आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः ।। ६ ।।

धनदेन समस्त्यागे सत्ये धर्म इवापरः ।
तमेवं गुणसम्पन्नं रामं सत्यपराक्रमम् ।। ७ ।।

प्रजासुखत्वे चन्द्रस्य वसुधायाः क्षमागुणैः ।
बुद्ध्या बृहस्पतेस्तुल्यो वीर्ये साक्षाच्छचीपतेः ।। ८ ।।

मृदुश्च स्थिरचित्तश्च सदा भव्योऽनसूयकः ।
प्रियवादी च भूतानां सत्यवादी च राघवः ।। ९ ।।

देवासुरमनुष्याणां सर्वास्त्रेषु विशारदः ।
सम्यग्विद्याव्रतस्नातो यथावत् साङ्गवेदवित् ।। १० ।।

यदा व्रजति सङ्ग्रामं ग्रामार्थे नगरस्य वा ।
गत्वा सौमित्रिसहितो नाविजित्य निवर्तते ।
सङ्ग्रामात् पुनरागम्य कुञ्जरेण रथेन वा ।। ११ ।।

पौरान् स्वजनवन्नित्यं कुशलं परिपृच्छति ।
पुत्रेष्वग्निषु दारेषु प्रेष्यशिष्य गणेषु च ।। १२ ।।

स्मितपूर्वाभिभाषी च धर्मं सर्वात्मना श्रितः ।
सम्यग्योक्ता श्रेयसां च न विगृह्य कथारुचिः ।। १३ ।।

रामो लोकाभिरामोऽयं शौर्यवीर्यपराक्रमैः ।
प्रजापालनसंयुक्तो न रागोपहतेन्द्रियः ।। १४ ।।

रामो विग्रहवान् धर्मः साधुः सत्यपराक्रमः ।
राजा सर्वस्य लोकस्य देवानामिव वासवः ।। १५ ।।

**श्लोकान्वयः -**

१. नियतात्मा महावीर्यः द्युतिमान् धृतिमान् वशी इक्ष्वाकुवंशप्रभवः रामः नाम जनैः श्रुतः। (बालकाण्डः १/८)

२. विपुलांसः, महाबाहुः, कम्बुग्रीवः, महाहनुः, श्रीमान्, बुद्धिमान्, नीतिमान्, वाग्मी, शत्रुनिबर्हणः । (बालकाण्डः १/९)

३. धर्मज्ञः, सत्यसन्धः, ज्ञानसम्पन्नः, यशस्वी, समाधिमान्, शुचिः, वश्यः, प्रजानां हिते रतःच । (बालकाण्डः १/१२)

४. स्वस्य धर्मस्य, रक्षिता, स्वजनस्य, रक्षिता, वेदवेदाङ्गतत्त्वज्ञः, धर्नुर्वेदे, निष्ठितः च । (बालकाण्डः १/१४)

५. सर्वशास्त्रार्थतत्त्वज्ञः, स्मृतिवान्, प्रतिभानवान्, सर्वलोकप्रियः, साधुः, अदीनात्मा विचक्षणः च । (बालकाण्डः १/१५)

६. समुद्रः सिन्धुभिः इव सर्वदा सद्भिः अभिगतः एव, सर्वसमः आर्यः सदा एव प्रियदर्शनः च। (बालकाण्डः १/१६)

७. त्यागे धनदेन समः, सत्ये अपरः धर्मः इव एवं गुणसम्पन्नं सत्यपराक्रमम् तं रामम् । (बालकाण्डः १/१९)

८. प्रजासुखत्वे, चन्द्रस्य, वसुधायाः क्षमागुणैः, बृहस्पतेः बुद्ध्या वीर्ये साक्षात् शचीपतेः तुल्यः।(अयोध्याकाण्डः २/३०)

९. राघवः सदा स्थिरचित्तः मृदुः भव्यः अनसूयकः सत्यवादी भूतानां प्रियवादी च (असीत्)। (अयोध्याकाण्डः २/३२)

१०. साङ्गवेदवित् सम्यग्विद्याव्रतस्नातः यथावत् देवासुरमनुष्याणां सर्वशास्त्रेषु विशारदः । (अयोध्याकाण्डः २/३४)

११-१२. यदा ग्रामार्थे नगरस्य वा सौमित्रिसहितः सङ्ग्रामं व्रजति, अविजित्य न निवर्तते। संग्रामात् कुञ्जरेण रथेन वा पुनरागम्य, नित्यं पौरान् स्वजनवत् गत्वा पुत्रेषु, अग्निषु, दारेषु, प्रेष्यशिष्यगणेषु च कुशलं परिपृच्छति ।(अयोध्याकाण्डः २/३७-३८)

१३. स्मितपूर्वाभिभाषी च धर्मं सर्वात्मना श्रितः श्रेयसां च सम्यग्योक्ता विगृह्य न कथारुचिः। (अयोध्याकाण्डः २/४२)

१४. अयं रामः शौर्यवीर्यपराक्रमैः लोकाभिरामः प्रजापालनसंयुक्तः न रागोपहतेन्द्रियः । (अयोध्याकाण्डः २/४४)

१५. रामः विग्रहवान् धर्मः, सत्यपराक्रमः साधुः देवानां मघवान् इव सर्वस्य लोकस्य राजा। (अरण्यकाण्डः ३७/१३)

## शब्दार्थः टिप्पणी

**महावीर्यः** : ಅಧಿಕಬಲವುಳ್ಳವನು-more powerful- महत् वीर्यं यस्य सः - बहुव्रीहिसमासः।

**द्युतिमान्** : भासमानः, कान्तियुक्तः-ಪ್ರಕಾಶಮಾನವಾದ -one who is shining

**धृतिमान्** : अचलमनः - ದೃಢಮನಸ್ಕನು - one who is determined

**शत्रुनिबर्हणः** : शत्रूणां नाशकर्ता-ಶತ್ರುಗಳನ್ನು ನಾಶಗೊಳಿಸುವವನು-destroyer of the enemies

**विपुलांसः** : विशालभुजः-ವಿಶಾಲವಾದ ಭುಜಗಳುಳ್ಳ-one who has broad shoulders विपुलौ अंसौ यस्य सः-बहुव्रीहिसमासः ।

**कम्बुग्रीवः** : शङ्खरेखाङ्कितकण्ठः-ಶಂಖದಂತಹ ಕುತ್ತಿಗೆಯುಳ್ಳ-A conch-shaped neck (sign of great fortune)

**महाहनुः** : महान्तौ हनू यस्य सः-बहुव्रीहिसमासः ।

**सत्यसन्धः** : ಸತ್ಯನಿಷ್ಠೆಯುಳ್ಳವನು-truthful-सत्या सन्धा यस्य सः-बहुव्रीहि समासः।

**समाधिमान्** : आश्रितरक्षणचिन्ता, परतत्त्वे समाहितमनाः-ಆಶ್ರಿತರ ರಕ್ಷಣೆಯಲ್ಲಿ ಮಗ್ನನಾಗಿರುವವನು, ಪರತತ್ತ್ವಚಿಂತಕನು-one who is involved in the protection of the people, coming to him seeking help, one who always thinks of the Ultimate truth.

| | | |
|---|---|---|
| **सर्वलोकप्रियः** | : | सर्वेषां लोकानां प्रियः-षष्ठीतत्पुरुषसमासः । |
| **विचक्षणः** | : | यथोचितलौकिकालौकिकासु सर्वक्रियासु कुशलः । |
| **आर्यः** | : | सर्वपूज्यः - ಸಜ್ಜನ- noble |
| **प्रियदर्शनः** | : | प्रियं दर्शनं यस्य सः-बहुव्रीहिसमासः । |
| **धनदेन समः** | : | कुबेरेण समः । |
| **सत्यपराक्रमः** | : | सत्यम् एव पराक्रमः यस्य सः-बहुव्रीहिसमासः । |
| **महाबाहुः** | : | महान्तौ बाहू यस्य सः-बहव्रीहिसमासः |
| **नियतात्मा** | : | जितेन्द्रियः-ಜಿತೇಂದ್ರಿಯನಾದ-one who has self - control<br>नियतः आत्मा येन सः-बहुव्रीहिसमासः |
| **निष्ठितः** | : | पण्डितः-ಪಂಡಿತನು-a scholar. |
| **देवासुरमनुष्याणाम्** | : | देवश्च असुरश्च मनुष्यश्च तेषाम्-द्वन्द्वसङ्घासः । |
| **विद्याव्रतस्नातः** | : | वेदमधीत्य स्नायात्-निखिलवेदाध्ययनान्तर्भाविस्नातः इत्यर्थः । |
| **साङ्गवेदवित्** | : | सम्यक् गुरुकुलवाससहितया चतुर्वेदानां षडङ्गानां च अध्ययनम् । |
| **अविजित्य** | : | सुबाहुमारीचविषये जेतृत्ववदन्यत्रापि जेतृत्वमबाधित्वमवगम्यते । |
| **न विगृह्य कथारुचिः** | : | वृथा कलह-जल्प-वितण्डादि कथारुचिः न इत्यर्थः । |
| **रागोपहतेन्द्रियः** | : | रागेण उपहतानि इन्द्रियाणि यस्य सः-बहुव्रीहिसमासः । |

## अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. रामः कस्मिन् वंशे जातः ?
2. शत्रुनिबर्हणः कः ?

3. त्यागे रामः केन समः ?

4. रामः कान् स्वजनवत् पश्यति ?

5. रामः कान् अविजित्य सङ्ग्रामात् न निवर्तते ?

6. वासवः केषां राजा ?

**II दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. श्रीरामस्य गुणान् सङ्गृह्य लिखत ।

**III मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. धर्मज्ञः सत्यसन्धश्च ........ च हिते रतः ।

2. सङ्ग्रामात् पुनरागत्य कुञ्जरेण...........वा ।

3. रामो विग्रहवान् ..............।

| रथेन, धर्मः, प्रजानाम् |
|---|

**IV पाठनाम उल्लिख्य अधोनिर्दिष्टसङ्ख्याकानां श्लोकानाम् अनुवादं कन्नड -आङ्ग्लभाषया वा कुरुत ।**

**श्लोकसङ्ख्याः - ३, ४, ५, ८, ९, १३,१५.**

## — योग्यता विस्तारः —

वाल्मीकिमहर्षिणा विरचिते रामायणे सप्तकाण्डाः सन्ति । ते बालकाण्डः, अयोध्याकाण्डः, अरण्यकाण्डः, किष्किन्धाकाण्डः, सुन्दरकाण्डः, युद्धकाण्डः, उत्तरकाण्डः चेति । अधुना अपि जनाः रामायणकाव्य वाचनं कुर्वन्ति । मानवजीवने अनेकाः समस्याः विद्यन्ते । तासां परिहारं रामायणमहाकाव्ये अन्वेष्टुं शक्यते । अस्य काव्यस्य महत्त्वं वर्णयितुं श्लोकाः अनेकाः सन्ति । तेषु केचन अत्र वर्णयितुम् उद्धृताः ।

कूजन्तं रामरामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥

वाल्मीकिगिरिसम्भूता रामसागरगामिनी ।
पुनातु भुवनं पुण्या रामायणमहानदी ।।
यावत् स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद्रामायणकथा लोकेषु प्रचलिष्यति ।।

**अनुशंसितग्रन्थाः**

1. श्रीमद्वाल्मीकिरामायणम्-तिलक-शिरोमणि-भूषणेतिटीकात्रयेणोपस्कृतम्-Edited by Srinivasha Shastri-Parimala Publications-Delhi -Reprinted 2001, Vol 1,2 and 4.

2. श्रीमद्वाल्मीकिरामायणम्-गीताप्रेस, गोरखपुरम्-Vol 1,2, 2011.

3. ಶ್ರೀಮದ್ವಾಲ್ಮೀಕಿ ರಾಮಾಯಣ-ಬಾಲಕಾಂಡ, ಅಯೋಧ್ಯಾಕಾಂಡ, ಅರಣ್ಯಕಾಂಡ -ಕನ್ನಡ ಅನುವಾದ ವಿದ್ವಾನ್ ಎನ್.ರಂಗನಾಥ ಶರ್ಮ-ಶ್ರೀ ರಾಮಮಂದಿರಂ ಟ್ರಸ್ಟ್, ನರಸಿಂಹರಾಜ ಕಾಲೋನಿ, ಬೆಂಗಳೂರು - 19 ನಾಲ್ಕನೆಯ ಮುದ್ರಣ 1997.

* * *

# ३. विवादः विनाशाय

(पञ्चतन्त्रम्-काकोलूकीयम्)

## पीठिका

विश्वविख्याते संस्कृतसाहित्ये गद्यसाहित्यस्य स्थानं महत्त्वपूर्णं विद्यते । संस्कृतकथा साहित्ये नीतिकथा महत्तमं स्थानं भजन्ते । नीतिकथासाहित्ये पञ्चतन्त्रं श्रेष्ठमिति परिगण्यते । पञ्चतन्त्रकथाः लोकनीतिं राजनीतिं च बोधयन्ति । अस्य ग्रन्थस्य रचयिता विष्णुशर्मा । ग्रन्थेऽस्मिन्-मित्रभेदः, मित्रसम्प्राप्तिः, काकोलूकीयम्, लब्धप्रणाशः, अपरीक्षितकारकश्चेति पञ्चतन्त्राणि सन्ति । प्रस्तुत कथाभागः **'काकोलूकीयमिति'** तन्त्रात् उद्धृतः ।

कश्चिद्वायसः कथामिमां कथयति ।

अत्र प्रमुखतया ''द्वयोः कलहः तृतीयस्य लाभाय कल्पेत, अतः कलहः न करणीयः''। इत्यंशं कविः प्रतिपादयति ।

**कस्मिंश्चिद्वृक्षे पुराहमवसम् । तत्राधस्तात्कोटरे कपिञ्जलो नाम चटकः प्रतिवसति स्म । अथ सदैवास्तमनवेलायामागतयोर्द्वयोरनेकसुभाषितगोष्ठ्या देवर्षिब्रह्मर्षिराजर्षिपुराण चरितकीर्तनेन च पर्यटनदृष्टानेककौतूहलप्रकथनेन च परमसुखमनुभवतोः कालो व्रजति । अथ कदाचित् कपिञ्जलः प्राणयात्रार्थमन्यैश्चटकैः सहान्यं पक्वशालिप्रायं देशं गतः । ततो यावन्निशासमयेऽपि नायातस्तावदहं सोद्वेगमनास्तद्वियोगदुःखितश्चिन्तितवान्-'अहो ! किमद्य कपिञ्जलो नायातः'? 'किं केनापि पाशेन बद्धः'? 'उताहोस्वित्केनापि व्यापादितः'? सर्वथा यदि कुशली भवति, तन्मां विना न तिष्ठति' । एवं मे चिन्तयतो बहून्यहानि व्यतिक्रान्तानि । ततश्च तत्र कोटरे कदाचिच्छीघ्रगो नाम शशकोऽस्तमनवेलायामागत्य प्रविष्टः । मयापि कपिञ्जलनिराशत्वेन न निवारितः । अथान्यास्मिन्नहनि कपिञ्जलः शालिभक्षणादतीव पीवरतनुः स्वमाश्रयं स्मृत्वा भूयोऽपि तत्रैव समायातः। अथवा साध्विदमुच्यते -**

**न तादृग्जायते सौख्यमपि स्वर्गे शरीरिणाम् ।**
**दारिद्र्येऽपि हि यादृकस्यात्स्वदेशे स्वपुरे गृहे ।। १ ।।**

**अथासौ कोटरान्तर्गतं शशकं दृष्ट्वा साक्षेपमाह- 'भोः शशक ! न त्वया सुन्दरं कृतं, यन्ममावसथस्थाने प्रविष्टोऽसि । तच्छीघ्रं निष्क्रम्यताम्' । शशक आह- 'न तवेदं गृहम्, किन्तु**

ममैव। तत् किं मिथ्या परुषाणि जल्पसि' ? । 'तन्ममैतद्गृहं न तव' इति । कपिञ्जल आह- 'भोः ! यदि स्मृतिं प्रमाणीकरोषि तदागच्छ मया सह येन स्मृतिपाठकं पृच्छावः, स यस्य ददाति स गृह्णातु । तथानुष्ठिते मयापि चिन्तितं- 'किमत्र भविष्यति ? मया द्रष्टव्योऽयं न्यायः'। ततः कौतुकादहमपि तावनुप्रस्थितः। अत्रान्तरे तीक्ष्णदंष्ट्रो नामारण्यमार्जारस्तयोर्विवादं श्रुत्वा, मार्गासन्नं नदीतटमासाद्य कृतकुशोपग्रहो, निमीलितैकनयन ऊर्ध्वबाहुरर्धपादस्पृष्टभूमिः श्रीसूर्याभिमुख इमां धर्मोपदेशनमकरोत् - 'अहो ! असारोऽयं संसारः । क्षणभङ्गुराः प्राणाः । स्वप्नसदृशः प्रियसमागमः । इन्द्रजालवत्कुटुम्बपरिग्रहोऽयम् । तद्धर्मं मुक्त्वा नान्या गतिरस्ति। उक्तं च -

अनित्यानि शरीराणि विभवो नैव शाश्वतः ।
नित्यं संनिहितो मृत्युः कर्तव्यो धर्मसंग्रहः ।। २ ।।

अन्यच्च -

संक्षेपात्कथ्यते धर्मो जनाः किं विस्तरेण वः ।
परोपकारः पुण्याय पापाय परपीडनम् ।। ३ ।।

अथ तस्य तां धर्मोपदेशनां श्रुत्वा शशक आह-'भो भोः ! कपिञ्जल ! एष नदीतीरे तपस्वी धर्मवादी तिष्ठति' । तदेनं पृच्छावः । कपिञ्जल आह -'ननु स्वभावतोऽस्माकं शत्रुभूतोऽयमस्ति'। तद्दूरे स्थितौ पृच्छावः । कदाचिदस्य व्रतवैकल्यं सम्पद्यते । ततो दूरस्थितावूचतुः 'भो भोस्तपस्विन्! धर्मोपदेशक ! आवयोर्विवादो वर्तते । तद्धर्मशास्त्रद्वारेणास्माकं निर्णयं कुरु' । 'यो हीनवादो स ते भक्ष्यः' इति । स आह-भद्रौ ! मा मैवं वदतम् । निवृत्तोऽहं नरकपातकमार्गात् ।

अहिंसैव धर्ममार्गः । उक्तं च -

अहिंसापूर्वको धर्मो यस्मात्सद्भिरुदाहृतः ।
यूकमत्कुणदंशादीस्तस्मात्तानपि रक्षयेत् ।। ४ ।।

एतेऽपि ये याज्ञिका यज्ञकर्मणि पशून्व्यापादयन्ति, ते मूर्खाः परमार्थं श्रुतेर्न जानन्ति । तत्र किलैतदुक्तम्-'अजैर्यष्टव्यम्'-इति । अजा व्रीहयस्तावत्सप्तवार्षिकाः कथ्यन्ते । न पुनः पशुविशेषाः । तन्नाहं भक्षयिष्यामि । परं जयपराजयनिर्णयं करिष्यामि । किन्त्वहं वृद्धो दूरात् युवयोर्भाषाऽन्तरं सम्यक् न श्रृणोमि । एवं ज्ञात्वा मम समीपवर्तिनौ भूत्वा, ममाग्रे न्याय्यं वदतं

**येन विज्ञाय विवादपरमार्थं वचो वदतो मे परलोकबाधो न भवति । तस्माद्विश्रब्धौ भूत्वा मम कर्णोपान्तिके स्फुटं निवेदयतम् ।**

**किं बहुना-तेन क्षुद्रेण तथा तौ तूर्णं विश्वासितौ, यथा तस्योत्सङ्गवर्तिनौ सञ्जातौ । ततश्च तेनापि समकालमेव एकः पादान्तेनाक्रान्तः अन्यो दंष्ट्राक्रकचेन च । एवं द्वावपि गतप्राणौ भक्षिताविति ।**

**श्लोकान्वयः -**

१. शरीरिणां दारिद्रिये अपि स्वदेशे स्वपुरे गृहे च यादृक् सौख्यं स्यात् हि तादृक् (सौभाग्यं) स्वर्गे अपि न जायते ।

२. शरीराणि अनित्यानि, विभवः नैव शाश्वतः, मृत्युः नित्यं सन्निहितः (अतः) धर्मसङ्ग्रहः कर्तव्यः ।

३. धर्मः सङ्क्षेपात् कथ्यते, हे जनाः, वः विस्तरेण किम्? परोपकारः पुण्याय परपीडनं पापाय भवति ।

४. यूक-मत्कुण-दंशादीःयस्मात् तान् अपि रक्षयेत्, तस्मात् सद्भिः अहिंसापूर्वकः धर्मः उदाहृतः ।

## शब्दार्थः टिप्पणी

| | | |
|---|---|---|
| **चटकः** | : | कुररः-ಗುಬ್ಬಚ್ಚಿ-sparrow |
| **यावन्निशासमयेऽपि** | : | यावत्+निशासमये+अपि । |
| **पीवरतनुः** | : | पीवरा तनुः यस्य सः, बहुव्रीहिः । |
| **निष्क्रम्यताम्** | : | निस्+क्रम् धातोः लोट्लकारः प्रथमपुरुषः एकवचनम् । |
| **तीक्ष्णदंष्ट्रः** | : | तीक्ष्णा दंष्ट्रा यस्य सः, बहुव्रीहिः । |
| **आसाद्य** | : | प्राप्य-ಪಡೆದು-having obtained, आ+सद्+ल्यप् । |

| | | |
|---|---|---|
| आह | : | 'ब्रूञ्-व्यक्तायां' वाचि धातोः लट् लकारः प्रथमपुरुषः एकवचनम्। |
| | | आह आहतुः आहुः |
| | | आत्थ आहथुः ब्रूथ |
| | | ब्रवीमि ब्रूवः ब्रूमः । |
| तन्ममैतद्गृहं | : | तत्+मम+एतत्+गृहम् । |
| धर्मोपदेशनाम् | : | ಧರ್ಮೋಪದೇಶವನ್ನು-spiritual teaching |
| प्राणयात्रार्थम् | : | ಪ್ರಾಣರಕ್ಷಣೆಗಾಗಿ -to protect one self |
| दंशा | : | ಕಾಡುನೊಣ-wild fly |
| यूकः | : | ಹೇನು -lice |
| मत्कुणः | : | ತಿಗಣೆ-bedbug |
| क्षणभङ्गुराः | : | क्षणिकाः-ಕ್ಷಣಿಕ-momentary |
| विश्रब्धौ | : | निश्शङ्कौ-ನಿರ್ಭಯ-without fear |
| ऊर्ध्वबाहुः | : | ऊर्ध्वौ बाहू यस्य सः, बहुव्रीहिसमासः । |
| व्रतवैकल्यं | : | विकलस्य भावो वैकल्यं, व्रतस्य वैकल्यं, षष्ठीतत्पुरुषसमासः । |
| दूरस्थितावूचतुः | : | दूरस्थितौ+ऊचतुः, अयवायावादेशसान्धिः । |
| अजा | : | व्रीहिः-ಏಳು ವರ್ಷಕ್ಕೊಮ್ಮೆ ಬೆಳೆಯುವ ಬಿದುರಕ್ಕಿ-bamboo rice which is harvested once in seven years. |
| आक्रान्तः | : | आ+क्रम्+क्त, भूतकृदन्तः, पुंलिङ्गः प्रथमा विभक्ति एक वचन रूपम् । |
| दंष्ट्राक्रकचेन | : | ಗರಗಸದಂತಹ ಹಲ್ಲುಗಳಿಂದ - with teeth as sharp as a saw- दंष्ट्रा एव क्रकचः तेन कर्मधारयसमासः । |

**ऊचतुः** : वच-परिभाषणे धातोः लिट्लकारः प्रथमपुरुषः द्विवचनम् ।

| | | |
|---|---|---|
| उवाच | ऊचतुः | ऊचुः |
| उवचिथ-उवक्थ | ऊचथुः | ऊच |
| उवाच-उवच | ऊचिव | ऊचिम |

**निवेदयतम्** : नि + विद् धातोः लोट्लकारः मध्यमपुरुषः द्विवचनम् ।

## अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. कपिञ्जलः कुत्र वसति स्म ?
2. चटकस्य नाम किम् ?
3. कपिञ्जलः किमर्थम् अन्यं देशं गतः?
4. शीघ्रगः कः ?
5. शश-कपिञ्जलयोः विवादनिर्णायकः कः ?

**II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. वायसः सोद्वेगं किम् अचिन्तयत् ?
2. शश-कपिञ्जलयोः वासस्थानविषयकः कलहः कः ?
3. 'विवादः विनाशाय' इति पाठस्य शीर्षिकां समर्थयत ।

**III दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. मार्जारस्य धर्मोपदेशः ।
2. मार्जारः शशकपिञ्जलौ कथं व्यापादयति ?

**IV पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत ।**

1. मया द्रष्टव्योऽयं न्यायः ।
2. ननु स्वभावतोऽस्माकं शत्रुभूतोऽयमस्ति ।
3. यो हीनवादी स ते भक्ष्यः ।
4. अहिंसैव धर्ममार्गः ।
5. तन्नाहं भक्षयिष्यामि ।

**V मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. केनापि ............बद्धः ?
2. परोपकारः पुण्याय............परपीडनम् ।
3. श्रुतेः परमार्थं.............न जानन्ति ।
4. ............ अहानि अतिक्रान्तानि ।

| बहूनि, मूर्खाः, पाशेन, पापाय |
|---|

**VI रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।**

1. आवयोः विवादः वर्तते।
2. नरकपातकमार्गात् निवृत्तो मार्जारः ।
3. नदीतीरे धर्मवादी तिष्ठति ।
4. अजाव्रीहयः सप्तवार्षिकाः कथ्यन्ते ।

## — योग्यताविस्तारः —

वासस्थानविषये प्रमाणमेवमस्ति -

**वापीकूपतडागानां देवालयकुजन्मनाम् ।**
**उत्सर्गात् परतः स्वाम्यमपि कर्तुं न शक्यते ।।**
**प्रत्यक्षं यस्य यत् मुक्तं क्षेत्राद्यं दशवत्सरान् :**
**तत्र भुक्तिः प्रमाणं स्यात् न साक्षी नाक्षराणि च ।।**

**मनुष्याणामयं न्यायो मुनिभिः परिकीर्तितः ।**
**तिरश्चाञ्च विहङ्गानां यावदेव समाश्रयः ।।**
**(पञ्चतन्त्रम्, काकोलूकीयम् -कथा ३ श्लोकाः ९३-९५)**

### अनुशंसित ग्रन्थाः


1. पञ्चतन्त्रम् - विष्णुशर्मा - प्रो. बालशास्त्री / चौखम्बा सुरभारती प्रकाशनम्, वाराणसी
2. पञ्चतन्त्रम् - विष्णुशर्मा - एम्.आर्. काले / मोतिलाल् बनारसीदास्, दिल्ली - ७
3. Pancatantra of Vishnusharman - Edited with English Notes by M.R.Kale Motilal Banarasidas - Delhi- Reprint 2008.


* * *

# ४. सत्त्वपरीक्षा

(महाभारतम् - वनपर्व)

## पीठिका

महाभारतस्य वनपर्वणः १४७-१५० अध्याययोः अयं भागः सङ्गृहीतः । पाण्डवमध्यमस्य भीमस्य प्रयत्नशीलत्वं, विनयशालिता, वार्धक्येऽपि हनूमतः शक्तिसामर्थ्यं, हनूमद्भीमयोः भ्रातृवात्सल्यं च सरलतया अत्र निरूपितं वर्तते ।

(भीमसेनः द्रौपद्यर्थं सौगन्धिकापुष्पमानेतुं गच्छन् मार्गमध्ये वृद्धमेकम् अतिकायं वानरं पश्यति। तमुपसृत्य भीमसेनः सिंहनादं करोति । तेन प्रबोधितः कपिः तस्य परिचयं पृच्छति । सः स्वपरिचयम् उक्त्वा, मार्गं दातव्यमिति सदर्पम् आदिशति । हनूमान् स्ववपुर्लङ्घयित्वा प्रयातुं सूचयति । तदा भीमः शास्त्रैः देहोल्लङ्घनं निषेधितं नो चेत् हनूमतः सागरोल्लङ्घनमिव तव वपुर्लङ्घयेयम् इति वदति। तदा हनूमान् संवादमिमम् आरभते ।)

**हनूमानुवाच-**

**क एष हनूमन्नाम सागरो येन लङ्घितः ।**
**पृच्छामि त्वां नरश्रेष्ठ कथ्यतां यदि शक्यते ।। १ ।।**

**भीम उवाच -**

**भ्राता मम गुणश्लाघ्यो बुद्धिसत्त्वबलान्वितः ।**
**रामायणेऽति विख्यातः शूरो वानरपुङ्गवः ।। २ ।।**

**स मे भ्राता महावीर्यः तुल्योऽहं तस्य तेजसा ।**
**बले पराक्रमे युद्धे शक्तोऽहं तव निग्रहे ।। ३ ।।**

**उत्तिष्ठ देहि मे मार्गं पश्य वा मेऽद्य पौरुषम् ।**
**मच्छासनमकुर्वाणं त्वां वा नेष्ये यमक्षयम् ।। ४ ।।**

**वैशम्पायन उवाच -**

**विज्ञाय तं बलोन्मत्तं बाहुवीर्येण दर्पितम् ।**
**हृदयेनावहस्यैनं हनूमान्वाक्यमब्रवीत् ।। ५ ।।**

हनूमानुवाच -

प्रसीद नास्ति मे शक्तिरुत्थातुं जरयानघ ।
ममानुकम्पया त्वेतत् पुच्छमुत्सार्य गम्यताम् ।। ६ ।।

वैशम्पायन उवाच -

सावज्ञमथ वामेन स्मयञ्जग्राह पाणिना ।
न चाशकच्चालयितुं भीमः पुच्छं महाकपेः ।। ७ ।।

उच्चिक्षेप पुनर्दोर्भ्यामिन्द्रायुधमिवोच्छ्रितम् ।
नोद्धर्तुमशकद् भीमो दोर्भ्यामपि महाबलः ।। ८ ।।

उत्क्षिप्तभ्रूर्विवृत्ताक्षः संहतभ्रुकुटीमुखः ।
खिन्नगात्रोऽभवद्भीमो न चोद्धर्तुं शशाक तम् ।। ९ ।।

यत्नवानपि तु श्रीमांल्लाङ्गूलोद्धरणोद्धुरः।
कपेः पार्श्वगतोभीमस्तस्थौ व्रीडानताननः ।। १० ।।
प्रणिपत्य च कौन्तेयः प्राञ्जलिर्वाक्यमब्रवीत्
प्रसीद कपिशार्दूल दुरुक्तं क्षम्यतां मम । ।।११।।
सिद्धो वा यदि वा देवो गन्धर्वो वाथ गुह्यकः ।
पृष्टस्सन् काम्यया ब्रूहि कस्त्वं वानररूपधृक् ।। १२ ।।

हनूमानुवाच -

अहं केसरिणः क्षेत्रे वायुना जगदायुषा ।
जातः कमलपत्राक्ष हनूमन्नाम वानरः ।। १३ ।।

वैशम्पायन उवाच -

उवाच श्लक्ष्णया वाचा हनूमन्तं कपीश्वरम् ।
मया धन्यतरो नास्ति यदार्यं दृष्टवानहम् ।। १४ ।।

**भीम उवाच -**

**अनुग्रहो मे सुमहांस्तृप्तिश्च तवदर्शनात् ।**
**एवं तु कृतमिच्छामि त्वयाद्य प्रियमात्मनः ।। १५ ।।**

**यत्वेददसीत् प्लवतः सागरं मकरालयम् ।**
**रूपमप्रतिमं वीर तदिच्छामि निरीक्षितुम् ।। १६ ।।**

**एवमुक्तस्तु भीमेन स्मितं कृत्वा प्लवङ्गमः ।**
**तद् रूपं दर्शयामास यद् वै सागरलङ्घने ।। १७ ।।**

**विसिष्मिये तदा भीमो जहृषे च पुनः पुनः।**
**तमर्कमिव तेजोभिः सौवर्णमिव पर्वतम् ।। १८ ।।**

**श्लोकान्वयः -**

१. हे नरश्रेष्ठ, त्वां पृच्छामि, यदि शक्यते कथ्यताम् - हनुमान् नाम क एषः येन सागरो लङ्घितः? (वनपर्व १४७/१०)

२. रामायणेऽतिविख्यातः गुणश्लाघ्यः बुद्धिसत्त्वबलान्वितः शूरः वानरपुङ्गवः मम भ्राता । (वनपर्व १४७/११)

३. स मे भ्राता महावीर्यः । बले पराक्रमे युद्धे तस्य तेजसा अहं तुल्यः। अहं तव निग्रहे शक्तः । (वनपर्व १४७/१३)

४. उत्तिष्ठ, मे मार्गं देहि अद्य मे पौरुषम् वा पश्य । मच्छासनमकुर्वाणं त्वां यमक्षयम् नेष्ये वा? (वनपर्व १४७/१४)

५. तं बलोन्मत्तं बाहुवीर्येण दर्पितम् विज्ञाय हृदयेन अवहस्य एनं हनूमान् वाक्यम् अब्रवीत् । (वनपर्व १४७/१५)

६. प्रसीद अनघ ! जरया मे उत्थातुं शक्ति : न अस्ति । अनुकम्पया तु एतत् मम पुच्छम् उत्सार्य गम्यताम् । (वनपर्व १४७/१६)

७. अथ भीमः सावज्ञं स्मयन् महाकपेः पुच्छं वामेन पाणिना जग्राह । चालयितुं न अशकत् च।(वनपर्व १४७/१९)

८. महाबलः भीमः पुनः दोर्भ्याम् उच्छ्रितम् इन्द्रायुधम् इव उच्चिक्षेप । (किन्तु) दोर्भ्याम् अपि उद्धर्तुं न अशकत् । (वनपर्व १४७/२०)

९-१०. उत्क्षिप्तभ्रूः विवृत्ताक्षः संहतभ्रुकुटीमुखः भीमः खिन्नगात्रः अभवत् । ततः यत्नवान् अपि तु श्रीमांल्लाङ्गूलोद्धरणोद्धुरः तम् उद्धर्तुं न शशाक। भीमः व्रीडानताननः कपेः पार्श्वगतः तस्थौ। (वनपर्व १४७/२१-२२)

११. कौन्तेयः प्राञ्जलिः प्रणिपत्य च वाक्यम् अब्रवीत् । कपिशार्दूल प्रसीद मम दुरुक्तं क्षम्यताम्।(वनपर्व १४७/२३)

१२. वानररूपधृक् त्वं कः? काम्यया पृष्टःसन् ब्रूहि सिद्धः वा यदि देवः वा गन्धर्वः वा अथ गुह्यकः वा । (वनपर्व १४७/२४)

१३. हे कमलपत्राक्ष, अहं हनूमन् नाम वानरः जगदायुषा वायुना केसरिणः क्षेत्रे जातः। (वनपर्व १४७/२७)

१४. मया धन्यतरो नास्ति यत् आर्यं दृष्टवान् अहम् (इति) श्लक्ष्णया वाचा कपीश्वरं हनूमन्तं उवाच। (वनपर्व १४९/२)

१५. तवदर्शनात् मे सुमहान् अनुग्रहो तृप्तिः च (जायते) । अद्य तु त्वया प्रियम् एवम् आत्मनः कृतम् इच्छामि । (वनपर्व १४९/३)

१६. हे वीर, यत् ते अप्रतिमं रूपं मकरालयं सागरं प्लवतः तदा आसीत् तत् निरीक्षितुम् इच्छामि।(वनपर्व १४९/४)

१७. भीमेन एवम् उक्तः तु प्लवङ्गमःस्मितं कृत्वा यत् वै सागरलङ्घने तत् रूपं दर्शयामास। (वनपर्व १५०/३)

१८. तदा तेजोभिः सौवर्णं पर्वतम् इव तम् अर्कम् इव (दृष्ट्वा) भीमःविसिष्मिये पुनः पुनः जहृषे च । (वनपर्व १५०/३१)

## शब्दार्थः टिप्पणी

| | | |
|---|---|---|
| **नरश्रेष्ठः** | : | नरेषु श्रेष्ठः- सप्तमी तत्पुरुषसमासः |
| **पृच्छामि** | : | पृच्छ् धातोः लट्लकारः उत्तमपुरुषः एकवचनम् |
| **रामायणेऽतिविख्यातः** | : | रमायणे+अतिविख्यातः -पूर्वरूप सन्धिः |
| **विख्यातः** | : | प्रख्यातः-ಪ್ರಸಿದ್ಧನು-famous |
| **गुणश्लाघ्यः** | : | गुणैः श्लाघ्यः -तृतीयतत्पुरुषसमासः |
| **बुद्धिसत्त्वबलान्वितः** | : | बुद्धिश्च सत्वं च बलं च अस्य अस्तीति -बहुव्रीहिसमासः |
| **वानरपुङ्गवः** | : | वानरश्रेष्ठः, उत्कृष्टः-ಕಪಿಶ್ರೇಷ್ಠನು-best among the monkeys-वानरेषु पुङ्गवः |
| **महावीर्यः** | : | महत् वीर्यं यस्य सः-बहुव्रीहिसमासः |
| **उत्तिष्ठ** | : | उत्+स्था धातोः लोट्लकारः मध्यमपुरुषः एकवचनम् । |
| **पौरुषम्** | : | पुरुषस्य भावम् |
| **मच्छासनम्** | : | मदीयं शासनम्, (मत् + शासनम्-छत्वसंन्धिः) |
| **अकुर्वाणम्** | : | न कुर्वाणम् |
| **यमक्षयम्** | : | यमस्य क्षयम् -आलयम् |
| **नेष्ये** | : | नयामि-ಒಯ್ಯುವೆನು-I shall take |
| **बाहुवीर्येण** | : | बाहुबलेन-ಬಾಹುಬಲದಿಂದ - with mighty arms - बाह्वोः वीर्यं तेन षष्ठीतत्पुरुषसमासः । |
| **दर्पितः** | : | गर्वितः-ಗರ್ವಿತನು-egotic |
| **बलोन्मत्तम्** | : | बाहुबलेन उन्मत्तम्-ಬಲೋನ್ಮತ್ತನು -infatuated with might बलेन उन्मत्तम्-तृतीयातत्पुरुषसमासः । |

| | |
|---|---|
| हृदयेन | मनसा - ಮನಃಪೂರ್ವಕವಾಗಿ - heartly |
| अवहस्य | विहस्य - ನಗೆಯನ್ನು ಬೀರಿ - having laughed |
| अनघः | पापरहितः - ಪಾಪರಹಿತನು - without sins. |
| जरया | ಮುಪ್ಪಿನಿಂದ - by old age - स्त्रीलिङ्ग तृतीयाविभक्तिः एकवचनम्। |
| उत्थातुम् | ಏಳಲು - to stand - उत्+स्था धातोः तुमन्नन्ताव्ययम् । |
| उत्सार्य | उत्+सृ धातोः ल्यबन्ताव्ययम् |
| सावज्ञम् | अनादरेण - ಅನಾದರದಿಂದ - with negligence - अवज्ञया सह । |
| महाकपेः | महान् च असौ कपिः च, तस्य कर्मधारयसमासः । |
| पुच्छं | लाङ्गूलम् - ಬಾಲ - tail |
| वामेन पाणिना | अनादरेण, तात्सारेण - ಎಡಗೈಯಿಂದ, ಅನಾದರದಿಂದ - with negligence by the left hand. |
| जग्राह | गृहीतवान् लिट्लकारः प्रथमपुरुषः एकवचनम् । |
| अशकत् | शक्तः अभवत् |
| चालयितुम् | स्थानान्तरं कर्तुम् - ಚಲಿಸುವಂತೆ ಮಾಡಲು - to make it move. |
| दोर्भ्यां | द्वयोः हस्तयोः - ಎರಡೂ ಕೈಗಳಿಂದ - by both the hands |
| उच्चिक्षेप | उत्-क्षिप् धातोः लिट्लकारः प्रथमपुरुषः एकवचनम् । |
| उद्धर्तुम् | तुमन्नन्ताव्ययम् |
| उत्क्षिप्तभ्रूः | प्रयत्नशीलत्वात् भ्रूविकारयुक्तः, उत्क्षिप्ते भ्रुवो यस्य सः |
| विवृत्ताक्षः | विवृत्ते अक्षिणी यस्य सः - बहुव्रीहिसमासः। |
| संहतभ्रुकुटीमुखः | आत्मनः शक्तिमनतिक्रम्य प्रयत्नयुक्तः - ಮಾಡಲು - With a frowned face. संहते भ्रुकुट्यौ मुखे यस्य सः - बहुव्रीहिसमासः। |

Revised Edition 2017

| | | |
|---|---|---|
| **तस्थौ** | : | स्था धातोः लिट्लकारः प्रथमपुरुषः एकवचनम् । |
| **उध्दुरः** | : | समर्थः-ಸಮರ್ಥನು-capable |
| **व्रीडानताननः** | : | लज्जया अधोमुखः-ಲಜ್ಜೆಯಿಂದ ತಲೆಬಾಗಿದವನು - head bent down with shame-व्रीडया आनतम् आननं यस्य सः:- बहुव्रीहिसमासः । |
| **खिन्नगात्रः** | : | म्लानदेहः- ಆಯಾಸಗೊಂಡ ದೇಹವುಳ್ಳವನು-one having a fatigued body |
| **कपिशार्दूलः** | : | कपिषु शार्दूलः श्रेष्ठः |
| **प्रसीद** | : | सन्तुष्टः भव - ಪ್ರಸನ್ನನಾಗು-be pleased. |
| **दुरुक्तम्** | : | दुष्टम् उक्तम् |
| **कमलपत्राक्षः** | : | कमलपत्रे इव अक्षिणी यस्य सः बहुव्रीहिसमासः |
| **हनूमान्** | : | हनुः अस्य अस्ति इति हनूमान् बहुव्रीहिसमासः |
| **जगदायुषा** | : | वायुना-ವಾಯುದೇವನಿಂದ-by the wind god-जगतः आयुषा । |
| **अप्रतिमम्** | : | असदृशम्-ಸಾಟಿಯಿಲ್ಲದ-matchless |
| **मकरालयम्** | : | सागरम्-ಸಾಗರವನ್ನು-ocean-मकराणाम् आलयम् । |
| **सागरलङ्घने** | : | सागरस्य लङ्घने-ಸಮುದ್ರವನ್ನು ದಾಟುವಲ್ಲಿ- in crossing the ocean. |
| **श्लक्ष्णया वाचा** | : | मृदु वचोभिः-ಮೃದುವಾದ ಮಾತುಗಳಿಂದ -with softwords |
| **विसिष्मिये** | : | विस्मितः-ಆಶ್ಚರ್ಯಚಕಿತನಾದನು-wonder struck |

| | | |
|---|---|---|
| विसिष्मिये | विसिष्मियाते | विसिष्मियिरे |
| विसिष्मियिषे | विसिष्मियाथे | विसिष्मियढ्वे<br>विसिष्मियिध्वे |
| विसिष्मिये | विसिष्मियिवहे | विसिष्मियिमहे |

जहृषे : प्रहृष्टः -ಸಂತಸಹೊಂದಿದನು - felt happy

## अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. भीमसेनः कं स्वभ्राता इति वदति ?
2. भीमसेनः केन सह तुल्यः ?
3. भीमसेनः केन पाणिना पुच्छं जग्राह ?
4. हनूमतः पिता कः ?
5. जगदायुः कः ?
6. मकारालयः कः ?

**II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. भीमसेनः हनूमतः विषये किं वदति ?
2. भीमसेनः आत्मानं कथं परिचाययति ?
3. भीमसेनः किमर्थं हनूमतः क्षमां याचति ?
4. हनूमान् स्वपरिचयं कथं करोति ?

**III दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1.भीमसेनस्य पात्रचित्रणम्, 2.हनूमता कृता भीमसत्त्वपरीक्षा, 3.हनूमद्भीमसंवादः ।

**IV मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. भ्राता मम..........बुद्धिसत्वबलान्वितः ।
2. बले पराक्रमे युद्धे..........तव निग्रहे ।
3. प्रसीद कपिशार्दूल..........क्षम्यतां मम ।
4. रूपमप्रतिमं वीर !...........निरीक्षितुम् ।
5. तद्रूपं दर्शयामास यद्वै............ ।

| सागरलङ्घने, तदिच्छामि, गुणश्लाघ्यो, शक्तोऽहं, दुरुक्तं |
|---|

**V रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।**

1. भीमः पुच्छं चालयितुं न शशाक ।
2. खिन्नगात्रोऽभवत् भीमः।
3. कौन्तेयः प्रणिपत्य वाक्यमब्रवीत्।

**VI पाठनाम उल्लिख्य अधोनिर्दिष्टसङ्ख्याकानां श्लोकानाम् अनुवादं कन्नडभाषया-आङ्ग्लभाषया वा कुरुत । श्लोकसङ्ख्याः - २, ४, ८, १३, १६, १८**

## — योग्यताविस्तारः —

लक्षश्लोकयुक्तमिदं महाभारतं '**शतसाहस्रीसंहिता**' इति प्रथितं वर्तते । महाभारते अष्टादश पर्वाणि सन्ति ।

| | | | |
|---|---|---|---|
| 1. आदिपर्व | 6. भीष्मपर्व | 11. स्त्रीपर्व | 16. मौसलपर्व |
| 2. सभापर्व | 7. द्रोणपर्व | 12. शान्तिपर्व | 17. महाप्रस्थानपर्व |
| 3. वनपर्व | 8. कर्णपर्व | 13. अनुशासनपर्व | 18. स्वर्गारोहणपर्वः |
| 4. विराटपर्व | 9. शल्यपर्व | 14. अश्वमेधिकपर्व | |
| 5. उद्योगपर्व | 10. सौप्तिकपर्व | 15. आश्रमवासिकपर्व | |

### व्यासप्रशस्तिः

भारतं च इक्षुदण्डं च प्रतिपर्व रसोद्भवम् ।

'यन्न भारते तन्नभारतम्', 'यदिहास्ति तदन्यत्र, यन्नेहास्ति न कुत्रचित्' इत्यादयः सूक्तयः ।

महाभारते सर्वशास्त्राणि शस्त्राणि च अन्तर्गतानीति सूचयन्ति । अत एव महाभारतं 'सरस्वत्याः वृष्टिः, इति श्लाघितं वर्तते ।

लक्षश्लोकाः सन्तीति कारणात् महाभारतस्य 'शतसाहस्री संहिता' इति ख्यातिरस्ति ।

श्रीमद्भगवद्गीता महाभारतस्यैव भागः ।

### अनुशंसितग्रन्थाः

1. महाभारतम् - गीताप्रेस, गोरखपुरम्-Vol 1, 2005.

2. महाभारतम्-Kamala Subramaniam-Bharathiya Bhavan's Book University, IV Edition-2007

* * *

# ५. महर्षिवचनपालनम्

(चम्पूरामायणम् - बालकाण्डः)

## पीठिका

संस्कृतवाङ्मये काव्यस्य भेदेषु चम्पूरपि अन्यतमः । विश्वनाथः 'साहित्यदर्पणे' '**गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते**' इति लक्षणम् आह । '**चम्पू**' इति स्त्रीलिङ्ग पदं चम्प्-चम्पर्यात इति धातोःनिष्पन्नम् । 'सुललितं चलति' इति चम्पू पदस्य अर्थः । गद्यकाव्ये न पद्यरसास्वादः, तथैव पद्यकाव्ये न गद्यरसास्वादः, परं चम्पूकाव्ये उभयरसास्वादः अनुभूयते सहृदयैः इति विशेषः ।

अयं पाठ्यभागः श्रीभोजराज विरचित चम्पूरामायणस्य बालकाण्डात् स्वीकृतः ।

भोजः विद्याराधकः कवीनां आश्रयदाता च आसीत् । कालान्तरेऽपि अस्य जीवनचरितम् अधिकृत्य अनेकाः कृतयः रचिताः ।

इदं काव्यं वाल्मीकि रामायणमधिकृत्य विरचितम् । अस्य शैली वैदर्भी । रामायणकथा संक्षिप्तरूपेण मनोहरशैल्या अत्र निरूपिता ।

(अथ रामे असमाप्त बाल्ये एव, तं यज्ञविघ्नध्वंसाय कौशिको अयाचत । वसिष्ठानुमत्या दशरथः सलक्ष्मणं रामं मुनिमनुप्रेषयामास । विश्वामित्रः रामाय **बला-अतिबला** इति द्वेविद्ये पथि अदात् । ततो ताटकावधानन्तरं मुनिः रामाय भृशाश्वोपज्ञानि अस्त्राणि ददौ ।)

**तदनु यथाविधि कृतसपर्येण मर्यादातीतमहिम्ना महितेन गाधेतरहृदयेन गाधिनन्दनेन सत्रपरित्राणार्थम् इत्थमभ्यर्थितोऽभूत् । राजन्, भवतस्तनयेन विनयाभिरामेण रामेण शरासनमित्रेण सौमित्रिमात्रपरिजनेन क्रियमाणक्रतुरक्षो रक्षोदुरितमुत्तीर्य कृतावभृथो भवितुमभिलषामीति । एतदाकर्ण्य कर्णपरुषं महर्षिभाषितम् अतिमात्रपुत्रवात्सल्यात् कौसल्याजानिः सशल्यान्तःकरणोऽभूत्। ततस्तस्मिन् बहुप्रकारैरवार्यनिश्चये भगवति विश्वामित्रे दशरथः तपनकुलहितेन पुरोहितेन एवमभिहितोऽभूत् ।**

**पर्याप्तभाग्याय भवानमुष्मै कुर्यात्सपर्यां कुशिकात्मजाय ।**
**निर्यातुधानां वसुधां विधातुं निर्यातु रामः सह लक्ष्मणेन ।। १ ।।**

**एवं वसिष्ठेन प्रतिष्ठापितधृतिर्दशरथः सुतप्रदानेन कुशिकसुतमनोरथमेव पूरयामास ।**

योगेन लभ्यो यः पुंसां संसारापेतचेतसाम् ।
नियोगेन पितुः सोऽयं रामः कौशिकमन्वगात् ।। २ ।।

तत्र सत्रं परित्रातुं विश्वामित्रो महामुनिः ।
सौमित्रिसहितं रामं नयन्नयमवोचत ।। ३ ।।

बलेन तपसां लब्धे बलेत्यतिबलेति च ।
विद्येते मयि काकुत्स्थ विद्ये ते वितरामि ते ।। ४ ।।

तदनु मानससरःप्रसृतां सरयूमतिक्रम्य वृत्रवधप्रवृद्धवृद्धश्रवः पमक्षालनलब्धमलयोः मलद-करूषनाम्नोःजनपदयोः सीम्नि कृतपदयोर्दाशरथ्योः पुनरप्येवमब्रवीत् ।

यक्षः सुकेतुर्द्रुहिणप्रसादाल्लेभे सुतां कामपि ताटकाख्याम् ।
सुन्दः किलैनां परिणीय तस्यां मारीचनीचं जनयाम्बभूव ।। ५ ।।

एकदा सुन्दे निहते मारीचः कुम्भसम्भवमभिभूय तस्य शापादवाप कौणपताम् । ताटकाप्यभूत्पुरुषादिनी । सेयमब्जासनसिद्धसिन्धुरसहस्रप्राणात्मजेन सह जनपदविपदं विदधाना व्यापादनीया त्वयेति । रामस्तमाकर्ण्य स्त्रीवधशमामकरोत् । किञ्च, वैरोचनीं मन्थरां वसुन्धरापराधधुरन्धरां पुरन्दरेण निहतां जनार्दनकृतमर्दनां च भार्गवजननीं प्रदर्श्य दाशरथेरमन्दां सुन्दवधूवधविचिकित्साम् उत्सारयामास ।

आश्रुतः श्रुतवृत्तेन तेन सुन्दप्रियावधः ।
तमेवान्ववदत्तस्य चापः शिञ्जारवच्छलात् ।। ६ ।।

तत्काले पिशिताशनाशपिशुना संध्येव काचिन्मुने
-रध्वानं तरसा रुरोध रुधिरक्षोदारुणा दारुणा ।
स्वाधीने हनने पुरीं विदधतीं मृत्योः स्वकृत्यात्यय-
क्रीडत्किमरसङ्घसमटमहाशृङ्गाटकां ताटका ।। ७ ।।

ततो भाविनि सङ्ग्रामे बद्धश्रद्धस्य ताटका ।
स्वप्राणान् रामबाणस्य वीरपाणमकल्पयत् ।। ८ ।।

**मुनिर्भृशाश्वोपज्ञानि ताटकामाथिने ददौ ।**
**अस्त्राणि जृम्भकादीनि जम्भशासनशासनात् ॥ ९ ॥**

**श्लोकान्वयः -**

१. भवान् अमुष्मै पर्याप्तभाग्याय कुशिकात्मजाय सपर्यां कुर्यात् । वसुधां निर्यातुधानां विधातुं रामः लक्ष्मणेन सह निर्यातु ।
२. यः रामः संसारापेतचेतसाम् पुंसां योगेन लभ्यः सः अयं पितुः नियोगेन कौशिकम् अन्वगात् ।
३. अयं महामुनिः विश्वामित्रः तत्र सत्रं परित्रातुं सौमित्रिसहितं रामं नयन् अवोचत ।
४. हे काकुत्स्थ ! तपसां बलेन लब्धे बला इति अतिबला इति च विद्ये मयि विद्येते । ते वितरामि ते।
५. सुकेतु यक्षः द्रुहिणप्रसादात् ताटकाख्यां कामपि सुतां लेभे । सुन्दः एनां परिणीय तस्यां मारीचनीचं जनयाम्बभूव किल ।
६. श्रुतवृत्तेन तेन सुन्दप्रियावधः आश्रुतः तस्य चापः शिञ्जारवच्छलात् तम् एव अन्ववदत्।
७. स्वाधीने हनने स्वकृत्यात्यय क्रीडत्किङ्करसङ्घसङ्कटमहाशृङ्गाटकां मृत्योः पुरीं विदधतीं पिशिताशनाशपिशुना रुधिरक्षोदारुणा संध्या इव काचित् दारुणा ताटका तत्काले मुनेः अध्वानं तरसा रुरोध ।
८. ततः ताटका भाविनि सङ्ग्रामे बद्धश्रद्धस्य रामबाणस्य स्वप्राणान् वीरपाणम् अकल्पयत् ।
९. मुनिः, जम्भशासनशासनात् भृशाश्वोपज्ञानि जृम्भकादीनि अस्त्राणि ताटकामाथिने ददौ ।

## शब्दार्थः टिप्पणी

**यथाविधि** : विधिं अनतिक्रम्य-अव्ययीभावसमासः

**सपर्या** : पूजा-ಪೂಜೆ -worship

**मर्यादा** : सीमा-ಸೀಮೆ, ಗಡಿ-border

**महितः** : पूजनीयः-ಪೂಜನೀಯ-revered person

**गाधेतरः** : गम्भीरः-ಗಂಭೀರವಾದ-dignified

**गाधिनन्दनः** : ಗಾಧಿಯ ಮಗ-ವಿಶ್ವಾಮಿತ್ರ-son of Gadhi-Vishwamithra

**विनयाभिरामेण** : ವಿನಯದಿಂದ ಶೋಭಿಸುವ-gleaming with obedience-विनयेन अभिरामः, तेन तृतीयातत्पुरुषसमासः ।

**शरासनमित्रेण** : ಧನುವನ್ನು ಮಿತ್ರನನ್ನಾಗಿಸಿಕೊಂಡ -who's friend is bow-शरासनं (धनुः) एव मित्रं यस्य तेन बहुव्रीहिसमासः ।

**क्रतुः** : ಯಜ್ಞ - religious sacrifice

**रक्षोदुरितं** : रक्षसां विघ्नम्-ರಾಕ್ಷಸರ ವಿಘ್ನಗಳನ್ನು-obstacles from the demons

**अवभृथ** : ಯಜ್ಞಾಂತದಲ್ಲಿ ಮಾಡುವ ಸ್ನಾನ-taking bath after religious sacrifice

**उत्तीर्य** : ದಾಟಿ-having crossed-उत्+तृ. धातु ल्यबन्ताव्ययम् ।

**कर्णपरुषम्** : ಕರ್ಣಕಠೋರ -harsh to hear-कर्णयोः परुषम् षष्ठीतत्पुरुषसमासः।

**कौसल्याजानिः** : कौसल्या जाया यस्य सः बहुव्रीहिसमासः-ದಶರಥ -Dasharatha

**सशल्यान्तःकरणः** : विदीर्णहृदयः-ಶೋಕದಿಂದ ಕೂಡಿದ ಮನಸ್ಸುಳ್ಳವನು-sorrowful heart-शल्येन सहितम् अन्तःकरणं यस्य सः - बहुव्रीहिसमासः ।

**तपनकुलम्** : ಸೂರ್ಯವಂಶ-sun race / clan of sun -तपनस्य कुलम् ।

**कुशिकात्मजः** : ವಿಶ್ವಾಮಿತ್ರ

**यातुधानः** : ರಾಕ್ಷಸ-demon

**पर्याप्तम्** : परिपूर्णम्-ಸಂಪೂರ್ಣ-complete

**निर्यातु** : ಹೊರಡಲಿ-let him go

निर्+या धातु लोट् लकारः प्रथमपुरुषः एकवचनम् ।

**प्रतिष्ठापितधृतिः** : ಧೈರ್ಯ ತುಂಬಲ್ಪಟ್ಟ-encouraged-प्रतिष्ठापिता धृतिः यस्य सः, बहुव्रीहिसमासः ।

**संसारापेतचेतसाम्** : संसारात् अपेतचेतसाम्-ಸಂಸಾರದಿಂದ ನಿವೃತ್ತವಾದ ಮನಸ್ಸುಳ್ಳವರು-those whose mind is renounced from the materialistic world

**नियोगेन** : निर्देशेन-ಆದೇಶದ ಮೇರೆಗೆ-according to order

**अन्वगात्** : अनुजगाम-ಅನುಸರಿಸಿದನು-followed-अनु+अगात्-यण्-लुङ् लकारः प्रथमपुरुषः एकवचनम् ।

**नयन्नयम्** : नयन्+अयम्-ङमुडागमसन्धिः नयन्-वर्तमानकृदन्तस्य पुंलिङ्गः प्रथमा विभक्तिः एकवचनम् ।

**विद्येते** : ನನ್ನಲ್ಲಿವೆ-I have-विद्-सत्तायाम् धातोः लट् लकारः प्रथमपुरुषः द्विवचनम् ।

**वृद्धश्रवः** : ಜ್ಞಾನಿಗಳ ಉಪದೇಶ ಕೇಳುವವನು, ಇಂದ್ರ-one who listens to knowledgeable people - वृद्धान् श्रृणोति इति ।

**पमम्** : (ಕೆಸರು) ಪಾಪ sin (ಪ್ರಸ್ತುತದಲ್ಲಿ ಬ್ರಹ್ಮಹತ್ಯಾದೋಷ ಎಂಬ ಅರ್ಥ)

**द्रुहिणः** : ಬ್ರಹ್ಮ - Brahma

**लेभे** : लभ् धातोः लिट् लकारः प्रथमपुरुषः एकवचनम्।

**प्रसादाल्लेभे** : ಅನುಗ್ರಹದಿಂದ ಪಡೆದನು-obtained with grace-प्रसादात् + लेभे-परसवर्ण सन्धिः ।

**कुम्भसम्भवः** : ಅಗಸ್ತ್ಯ -Agastya

**कौणपता** : ಹೆಣವನ್ನು ತಿನ್ನುವ ಸ್ವಭಾವವುಳ್ಳವನು, ರಾಕ್ಷಸತ್ವ-cannibalism-कुणपस्य भक्षणं शीलं अस्य

**पुरुषादिनी** : ನರಮಾಂಸ ಭಕ್ಷಕ-a cannibal-पुरुषान् अत्ति इति ।

अब्जासनः : ಬ್ರಹ್ಮ-Brahma-अब्जं आसनं यस्य सः बहुव्रीहिसमासः ।

सिन्धुरः : ಆನೆ-Elephant

प्राणः : बलः-ಪರಾಕ್ರಮ-might

वैरोचनी : ವಿರೋಚನನ ಮಗಳು-daughter of virochana★(P-45)

विरोचनः : ಪ್ರಹ್ಲಾದನ ಮಗನ ಹೆಸರು-son of Prahlada

अपराधधुरन्धरा : ಅಪರಾಧ ಮಾಡುವುದರಲ್ಲಿ ಅಗ್ರಗಣ್ಯ-notorious criminal

अपराधे धुरन्धरा-सप्तमी तत्पुरुष समासः

पुरन्दरः : ಇಂದ್ರ-Indra-शत्रुपुरान् दारयति इति ।

भार्गवः : ಶುಕ್ರಾಚಾರ್ಯ, ಪರಶುರಾಮ-Shukracharya-Parashurama

भार्गवजननी : ಶುಕ್ರಾಚಾರ್ಯರ ತಾಯಿ ಖ್ಯಾತಿ, ಪರಶುರಾಮನ ತಾಯಿ ರೇಣುಕಾ★★(P-45)

अमन्दः : ಅಧಿಕ-ample

आश्रुतः : ಅಂಗೀಕರಿಸಿದನು, ಪ್ರತಿಜ್ಞೆಗೈದನು-sworn

शिञ्जारवः : ಬಿಲ್ಲಿನ ಹೆದೆಯ ಧ್ವನಿ, ಧನುಷ್ಟಂಕಾರ-sound of a bowstring

छलात् : ನೆಪದಿಂದ-under the pretext

शृङ्गाटकः : चतुष्पथः-ನಾಲ್ಕುದಾರಿಗಳು ಸೇರುವ ಚೌಕ-a square, a circle

तरसा : बलेन, हठात्-ಒಮ್ಮೆಲೇ-suddenly

स्वाधीने हनने : ಕೊಲ್ಲುವ ಕಾರ್ಯವನ್ನು ತಾನು ಕೈಗೆತ್ತಿಕೊಂಡು-herself took the task of killing

स्वकृत्यात्यय : ತಮ್ಮ (ಯಮಭಟರ) ಕಾರ್ಯಕ್ಕೆ (ಕೊಲ್ಲುವ ಕೆಲಸಕ್ಕೆ) ಅಡ್ಡಿ-(ಕೊಲ್ಲುವ ಕಾರ್ಯವನ್ನು ತಾಟಕಿಯು ತಾನು ಮಾಡುತ್ತಿರುವುದರಿಂದ ಯಮಭಟರು ಗುಂಪಾಗಿ ಯಮಪುರಿಯ ಬೀದಿಯಲ್ಲಿ ವಿನೋದದಲ್ಲಿ ತೊಡಗಿದ್ದರು.)-(As Tataki herself took to

kill, the servants of Yama were devoid of their work and were enjoying in the streets of Yamapuri)

१. पिशिताशन-आश-पिशुना : ರಾಕ್ಷಸರು ಆಹಾರವನ್ನು ಸ್ವೀಕರಿಸುವ ಕಾಲಸೂಚಕಗಳು ಎಂದರೆ ಸಂಧ್ಯೆ-one who indicates the time of taking food for demons-i.e. evening.

२. पिशिताश-नाश-पिशुना : ರಾಕ್ಷಸರ ನಾಶದ ಸೂಚಕಗಳು. ಮೊದಲು ತಾನೇ ರಾಮನಿಂದ ಮರಣಹೊಂದಿ, ಮುಂದೆ ರಾಕ್ಷಸರ ಕುಲವೇ ಸಂಹಾರವಾಗಲಿದೆಯೆಂದು ಸೂಚಿಸಿದವಳು-one who indicates the destruction of demons. First she offered her life to the arrows of Rama showing that the whole clan of demons is going to be destroyed in future.

रुधिरक्षोदारुणा :
1) रुधिर-क्षोध-अरुणा-ಕುಂಕುಮಧೂಳಿ ಹರಡಿದೆಯೋ ಎಂಬಂತೆ ಕೆಂಪಾಗಿರುವ ಸಂಧ್ಯೆ-the time of dusk, which is red in colour, which looks as though the kumkum powder is spread.
2) ರಕ್ತವನ್ನು ಮೆತ್ತಿಕೊಂಡು ಅದು ಒಣಗಿ ಕೆಸರು ಬಳಿದಂತೆ ತಾಟಕೆ ಕೆಂಪಾಗಿದ್ದಳು-Tataka was red as she was smeared with blood, which after cloting looked as though she was smeared with moss.

दारुणा : ಘೋರಳಾದ -frightful

वीरपाणम् : ಯುದ್ಧಕ್ಕೆ ಹೋಗುವಾಗ ವೀರರು ಕುಡಿಯುವ 'ಪಾನ'-the drink taken by the valients before entering the battle field.

| | | |
|---|---|---|
| **भाविनि** | : | ನಡೆಯಲಿರುವ - which is going to happen |
| **जम्भशासनः** | : | ಜಂಭನೆಂಬ ರಾಕ್ಷಸನನ್ನು ಕೊಂದವ, ಇಂದ್ರ-Lord Indra who destroyed the demon Jambha. |
| **ताटकामाथिने** | : | ताटकां मथ्नाति इति, तस्मै । |
| **ददौ** | : | ನೀಡಿದನು (ಅಸ್ತ್ರಗಳ ಮಂತ್ರೋಪದೇಶವನ್ನು ಮಾಡಿದನು) - taught the spell of missiles - दा धातोः लिट्लकारः प्रथमपुरुषः एकवचनरुपम् । |

## अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. दशरथः कस्य सपर्यां करोति ?
2. शरासनमित्रः कः ?
3. सुकेतुः कः ?
4. वृद्धश्रवः कः ?
5. मारीचः कस्य शापात् कौणपताम् अवाप ?
6. पुरुषादिनी का ?
7. विरोचनस्य पुत्री का ?

**II दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. विश्वामित्रस्य विज्ञापनं तथा दशरथसस्य निर्णयम् ।
2. ताटकावधसन्दर्भे श्रीरामस्य सन्देहः कः ? सः कथं निवारितः ?
3. ताटका वृत्तान्तः ।

**III पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत ।**

1. कृतावभृथो भवितुमभिलषामि ।

2. निर्यातु रामः सह लक्ष्मणेन ।

3. बलेन तपसा लब्धे बलेत्यतिबलेति च ।

4. मारीचनीचं जनयां बभूव ।

5. व्यापादनीया त्वयेति ।

**IV मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. तत्र सत्रं परित्रातुं..........महामुनिः ।

2. दशरथः............कुशिकसुतमनोरथमेव पूरयामास ।

3. आश्रुतः श्रुतवृत्तेन तेन..............।

4. स्वप्राणान्...........वीरपाणमकल्पयत् ।

| रामबाणस्य, विश्वामित्रो, सुतप्रदानेन, सुन्दप्रियावधः |
|---|

**V रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।**

1. मुनिः अस्त्राणि <u>ताटकामाथिने</u> ददौ ।

2. सुकेतुः द्रुहिणप्रसादात् <u>सुतां</u> लेभे ।

3. <u>रामः</u> स्त्रीवधशङ्काम् अकरोत् ।

**VI संयोजयत**

| अ | आ |
|---|---|
| अतिबला | कुम्भसम्भवः |
| श्रीरामः | विद्या |
| विश्वामित्रः | काकुत्स्थः |
| अगस्त्यः | गाधिनन्दनः |

## — योग्यता विस्तारः —

### चम्पूसाहित्यस्य इतिहासः

क्रि.श. सप्तमशतमानीयः इति कथितः दण्डी स्वीये काव्यादर्शे चम्पूप्रकारम् उल्लेखयति । अतः एतत्काव्यप्रकारं कि.श. सप्तमशतकात् प्रागेव असीदिति वक्तुं शक्यते ।

भोजराजस्य कालः क्रि.श. ११ शतमानः । अयं क्रि.श. १०१८ तः १०६३ पर्यन्तं वैभवेन राज्यं शशास । चम्पूरामायणे बाल-अयोध्या-अरण्य-किष्किन्धा-सुन्दर इति पञ्चकाण्डाः भोजेन तथा षष्ठः युद्धकाण्डः लक्ष्मणसूरिणा रचितः ।

**भोजस्य प्रमुखाः अन्याः कृतयः -** १. शृङ्गारप्रकाशः २. सरस्वतीकण्ठाभरणम् ३. सङ्गीतप्रकाशः ४. तत्त्वप्रकाशः ५. विद्याविनोदः इत्यादि द्वादश ग्रन्थाः अस्य नाम्नि प्रसिद्धाः ।

कालानुक्रमतया अद्य एतानि सुप्रसिद्धचम्पूकाव्यानि उपलभ्यन्ते-

| | | |
|---|---|---|
| 1. **जीवन्धरचम्पू** | हरिचन्द्रः | क्रि.श.६ अथवा १० शतकम् । |
| 2. **नलचम्पू-मदालसचम्पू** | त्रिविक्रमः | क्रि.श. १० शतकम् । |
| 3. **यशस्तिलकचम्पू** | सोमदेवः | क्रि.श. १० शतकम् । |
| 4. **चम्पूरामायणम्** | भोजराजः | क्रि.श. ११ शतकम् । |
| 5. **भागवतचम्पू** | अभिनवकालिदासः | क्रि.श. ११ शतकम् । |
| 6. **भारतचम्पू** | अनन्तभट्टः | क्रि.श. १५ शतकम् । |
| 7. **विश्वगुणादर्शचम्पू** | वेङ्कटाध्वरिः | क्रि.श. १७ शतकम् । |
| 8. **नीलकण्ठविजयचम्पू** | नीलकण्ठदीक्षितः | क्रि.श. १७ शतकम् । |

**काकुत्स्थः**- ककुदि तिष्ठतीति ककुत्स्थः । तस्य गोत्रोत्पन्नः काकुत्स्थः । पुरञ्जयो नाम सूर्यवंशस्य राजा देवासुरयुद्धे वृषभरुपी देवेन्द्रस्य ककुदि उपविशन् युद्धं कृत्वा ककुत्स्थः इति नाम प्राप्तवान् । तस्य गोत्रोत्पन्नः श्रीरामः काकुत्स्थः ।

**बला-अतिबला विद्या** -

उत्साहबलयोर्वृद्धिः परशस्त्रसहिष्णुता ।
न बाधा क्षुत्पिपासाभ्यां यतः सा कथिता **बला** ।।

यतः परस्य स्खालित्यं दृङ्मनः कायकर्मणाम् ।
स्वोपाये च ह्यमोघत्वं भवेत्साऽ**तिबला** मता ।।

**वृत्रवधः** - शुक्राचार्यस्य पुत्रः त्वष्टा इन्द्रसंहारार्थं यज्ञमुखात् वृत्रं प्राप्तवान् । परन्तु मन्त्रस्वरव्यत्ययात् वृत्र एव इन्द्रेण हतः । दधीचि कथा अत्र स्मरणीया ।

**वैरोचनी**★ - प्रह्लादपुत्रविरोचनस्य पुत्री मन्थरा भूदेवीं हन्तुं उपक्रम्य देवेन्द्रेण हता ।

**भार्गवजननी**★★ - १. भृगुमहर्षेः पत्नी, शुक्राचार्यस्य माता '**ख्यातिः**' नामधेया देवेन्द्रं हन्तुं आशितवती । तदा विष्णुः तां संहरति । २. '**रेणुका**', परशुरामावतारिणा विष्णुना पितृवाक्यपरिपालनार्थं स्वमाता रेणुका निहता ।

**अनुशंसितग्रन्थाः**


1. चम्पूरामायणम् (बालकाण्डम्)-सं.श्री लोकमणि दहाल-चौखम्भा अमरभारती प्रकाशन, वारणासि-०१
2. चम्पूरामायणम्-सं. वासुदेवलक्ष्मणशास्त्रिपणसीकर-चौखाम्भा अमरभारती प्रकाशन, वारणासि - ०१ Second Edition-1998
3. चम्पूरामायणम्-पं रामनाथ त्रिपाठी शास्त्री-चौखम्बा कृष्णदास अकादमी, वाराणासी-१९७८
4. ಚಂಪೂರಾಮಾಯಣಮ್ (ಬಾಲಕಾಂಡಮ್)-ಸಂ. ಡಾ. ಮಹೇಶ ಅಡಕೋಳಿ-ಅಭಿಜ್ಞಾನ, ಬೆಂಗಳೂರು (ಮೂಲ, ಅನ್ವಯ, ಕನ್ನಡ ಅನುವಾದ)


✻ ✻ ✻

# ६. कन्येयं कुलजीवितम्

(कुमारसम्भवमहाकाव्यम्  -  षष्ठःसर्गः)

## पीठिका

**'कन्येयं कुलजीवितम्'** पद्यभागोऽयं महाकविकालिदासविरचितात् **'कुमारसम्भवम्'** इति महाकाव्यात् स्वीकृतोऽस्ति । शिवपुराणोक्तं कथावस्तु आधृत्य १७ सर्गैः निबद्धमिदं महाकाव्यम् । अस्मिन् काव्ये अष्टमसर्गपर्यन्तं शिवपार्वत्योः विवाहविषयकवस्तु हृदयङ्गमया रीत्या वर्णितमस्ति ।

अयं पद्यभागः कुमारसम्भवमहाकाव्यस्य षष्ठसर्गात् सङ्गृहीतः । सप्तर्षयः हिमवतः समीपम् आगच्छन्ति । यथोचितं तान् समर्चयति पर्वतराजः । मुनयः शिवाय वधूर्भवितुं पार्वतीं याचन्ते । अस्मिन् विषये पर्वतराजः स्वपत्न्याः मेनायाः अभिमतं प्राप्य सन्तुष्टः भवति । पाठ्यभागेऽस्मिन् कन्या कथं स्वपितुः गृहं प्रति तथा पतिगृहं प्रति कलशप्राया कुलजीविता च भवितुम् अर्हा इति सन्देशः चित्ताकर्षकरीत्या सरलसुन्दरभाषया च वर्णितः अस्ति । अस्माभिः सर्वैः सदाचाराणां जीवनमौल्यानां च पालनम् अनिवार्यम् इति गम्भीरतया अत्र निरूपिता अस्ति ।

**तत्र वेत्रासनासीनान् कृतासनपरिग्रहः ।**
**इत्युवाचेश्वरान्वाचं प्राञ्जलिर्भूधरेश्वरः ।। १ ।।**

**अवैमि पूतमात्मानं द्वयेनैव द्विजोत्तमाः ।।**
**मूर्ध्नि गङ्गाप्रपातेन धौतपादाम्भसा च वः ।। २ ।।**

**कर्तव्यं वो न पश्यामि स्याच्चेत्किं नोपपद्यते ।**
**मन्ये मत्पावनायैव प्रस्थानं भवतामिह ।। ३ ।।**

**एते वयममी दाराः कन्येयं कुलजीवितम् ।**
**ब्रूत येनात्र वः कार्यमनास्था बाह्यवस्तुषु ।। ४ ।।**

**अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु ।**
**ऋषयो नोदयामासुः प्रत्युवाच स भूधरम् ।। ५ ।।**

तदागमनकार्यं नः शृणु कार्यं तवैव तत् ।
श्रेयसामुपदेशात्तु वयमत्रांशभागिनः ।। ६ ।।

स ते दुहितरं साक्षात्साक्षी विश्वस्य कर्मणाम् ।
वृणुते वरदः शम्भुरस्मत्सङ्क्रमितैः पदैः ।। ७ ।।

तमर्थमिव भारत्या सुतया योक्तुमर्हसि ।
अशोच्या हि पितुः कन्या सद्भर्तृप्रतिपादिता ।। ८ ।।

यावन्त्येतानि भूतानि स्थावराणि चराणि च ।
मातरं कल्पयन्त्वेनामीशो हि जगतः पिता ।। ९ ।।

उमा वधूर्भवान् दाता याचितार इमे वयम् ।
वरः शम्भुरलं ह्येष त्वत्कुलोद्भूतये विधिः ।। १० ।।

अस्तोतुः स्तूयमानस्य वन्द्यस्यानन्यवन्दिनः ।
सुता सम्बन्धविधिना भव विश्वगुरोर्गुरुः ।।११।।

एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ।। १२ ।।

शैलः सम्पूर्णकामोऽपि मेनामुखमुदैक्षत ।
प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः ।। १३ ।।

इदमत्रोत्तरं न्याय्यमिति बुद्ध्या विमृश्य सः ।
आददे वचसामन्ते मङ्गलालङ्कृतां सुताम् ।। १४ ।।

एहि विश्वात्मने वत्से भिक्षासि परिकल्पिता ।
अर्थिनो मुनयः प्राप्तं गृहमेधिफलं मया ।। १५ ।।

**श्लोकान्वयः -**

१. तत्र वेत्रासनासीनान् ईश्वरान् भूधरेश्वरः कृतासनपरिग्रहः (सन्) प्राञ्जलिः इति उवाच ।

२. हे द्विजोत्तमाः, मूर्ध्नि गङ्गाप्रपातेन, वः धौतपादाम्भसा (च) द्वयेनैव आत्मानं पूतम् अवैमि।

३. वः कर्तव्यं न पश्यामि स्यात् चेत् किं न उपपद्यते? मत्पावनाय एव भवताम् इह प्रस्थानं मन्ये।

४. एते वयम् अमी दाराः कुलजीवितम् इयं कन्या । अत्र येन वः कार्यम् ब्रूत, बाह्यवस्तुषु अनास्थाः ।

५. अथ ऋषयः उदाहरणवस्तुषु अग्रण्यम् आङ्गीरसम् नोदयामासुः । सः भूधरं प्रत्युवाच ।

६. तत् नः आगमनकार्यं शृणु । तत् कार्यं तव एव, नः तु श्रेयसामुपदेशात् वयम् अत्र अंशभागिनः।

७. विश्वस्य कर्मणाम् साक्षी साक्षात् सः वरदः शम्भुः अस्मत् सङ्क्रामितैः पदैः ते दुहितरं वृणुते।

८. भारत्या अर्थम् इव ते सुतया योक्तुम् अर्हसि सद्भर्तृप्रतिपादिता कन्या पितुः अशोच्या हि ।

९. स्थावराणि चराणि च यावन्ति एतानि भूतानि सन्ति, एनां मातरं कल्पयन्तु ईशो हि जगतः पिता।

१०. उमा वधूः, भवान् दाता, इमे वयम् याचितारः, शम्भुः वरः, एष हि विधिः त्वत्कुलोद्भूतये अलम्।

११. अस्तोतुः स्तूयमानस्य अनन्यवन्दिनः वन्द्यस्य सुता सम्बन्धविधिना विश्वगुरोः गुरुः भव ।

१२. देवर्षौ एवं वादिनि पितुः पार्श्वे अधोमुखी पार्वती लीलाकमलपत्राणि गणयामास ।

१३. शैलः सम्पूर्णकामः अपि मेनामुखम् उदैक्षत। प्रायेण कुटुम्बिनः कन्यार्थेषु गृहिणीनेत्राः भवन्ति।

१४. इदम् उत्तरम् अत्र न्याय्यम् इति बुद्ध्या विमृश्य सः वचसामन्ते मङ्गलालङ्कृताम् सुताम् आददे।

१५. हे वत्से एहि त्वं विश्वात्मने भिक्षा परिकल्पिता असि, मुनयः अर्थिनः, गृहमेधिफलं मया प्राप्तम् ।

## शब्दार्थः टिप्पणी

**वेत्रासनम्** : ಬೆತ್ತದ ಆಸನ ವಿಶೇಷ-seats made of bamboo

**भूधरेश्वरः** : ಪರ್ವತಗಳ ಒಡೆಯ, ಪರ್ವತರಾಜ- king of mountains, भूधराणाम् ईश्वरः - षष्ठीतत्पुरुषसमासः ।

| | | |
|---|---|---|
| **धौतपादाम्भसा** | : | ಪಾದವನ್ನು ತೊಳೆದುದರಿಂದ ಸ್ವಚ್ಛ ಮಾಡಿದ ಜಲ, ಪವಿತ್ರವಾದ- water purified by washing the feet of the great sages, |
| **दाराः** | : | ಹೆಂಡತಿ, ಪತ್ನಿ-wife-दाराः शब्द नित्यपुलिङ्गः, प्रथमाविभक्तिः बहुवचनरूपम् |
| **कुलजीवितम्** | : | कुलस्य जीवितम्-प्राणभूता-परमप्रेमास्पदमित्यर्थः - ಪರಮ ಪ್ರೀತಿಪಾತ್ರಳಾದ - Life of the clan, most beloved |
| **पावनाय** | : | ಪಾವನಗೊಳಿಸಲು - to purify |
| **अग्रण्यम्** | : | ಶ್ರೇಷ್ಠರಾದ - the best, foremost |
| **नोदयामासुः** | : | णिजन्तः 'णुद प्रेरणे' धातु, लिट्लकारः प्रथमपुरुषः बहुवचनम् । |
| **दुहितरम्** | : | ಮಗಳನ್ನು, ಪುತ್ರಿಯನ್ನು-दुहितृ शब्द 'ऋ'कारान्त स्त्रीलिङ्गः-Daughter |
| **वृणुते** | : | वृञ् वरणे धातु आत्मनेपदि, लट्लकारः प्रथमपुरुषः एकवचनम् । |
| **योक्तुं** | : | ಒಟ್ಟಿಗೆ, ಸೇರಿಸು-to unite - युज्, तुमुन्नन्ताव्ययम् |
| **स्थावराणि** | : | ಸ್ಥಿರವಾಗಿರುವುದು-immovable |
| **चराणि** | : | ಚಲನೆಯಲ್ಲಿರುವುದು-movable |
| **याचितारः** | : | ಪ್ರಾರ್ಥಿಸುವವರು पुंलिङ्गः प्रथमाविभक्तिः बहुवचनम् । |
| **गृहिणीनेत्राः** | : | गृहिणी एव नेत्रं येषां ते- बहुव्रीहिसमासः । |
| **गणयामास** | : | 'गण संख्याने' धातोः लिट्लकारः प्रथमपुरुषः एकवचनम् । |
| **उदैक्ष्यत** | : | उत्-उपसर्गपूर्वक 'इक्ष् दर्शने' आत्मनेपदिधातोः लङ्लकारः प्रथमपुरुषः एकवचनम्। |
| **गृहमेधि** | : | गृहमेधः यज्ञः कर्तृत्वेन विद्यते अस्य । |
| **अर्थिनः** | : | अर्थ येषां ते -ಪಡೆಯಲಿಚ್ಛಿಸುವ -wishing to gain or obtain |
| **गृहमेधिफलम्** | : | गृहमेधिनो-गृहस्थस्य फलम् । कन्यादानं गृहस्थस्य फलमित्यर्थः । |

Revised Edition 2017

## अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. पर्वतराजस्य पुत्री का ?
2. मेना कस्य पत्नी ?
3. उदाहरणवस्तुषु अग्रण्यः कः ?
4. अधोमुखी पार्वती किं गणयामास ?
5. जगतः पिता कः ?

**II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. मुनयः किमर्थं हिमवतः समीपम् आगताः ?
2. हिमवान् ऋषीणाम् आगमने किम् उक्तवान् ?
3. पुत्र्याः विवाहविषये पर्वतराजस्य निर्णयः कः ?

**III दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. कन्येयं कुलजीवितम् इति पद्यभागस्य सारांशं लिखत ।
2. अङ्गिरसः हिमवन्तं किम् अवोचत् ?

**IV पाठनाम उल्लिख्य अधोनिर्दिष्टसङ्ख्याकानां श्लोकानाम् अनुवादं कन्नड-आङ्ग्लभाषया वा कुरुत । श्लोकसङ्ख्याः - १, ४, ९, १२, १४**

**V मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. इत्युवाचेश्वरान्वाचं प्राञ्जलिः............।
2. अशोच्या हि पितुः कन्या............प्रतिपादिता ।
3. लीला...........गणयामास पार्वती ।
4. प्रायेण...........कन्यार्थेषु कुटुम्बिनः ।

5. अर्थिनो मुनयः प्राप्तं..........फलं मया ।

| |
|---|
| गृहमेधि, गृहिणीनेत्राः, कमलपत्राणि, सद्भर्तुः, भूधरेश्वर |

## VI संयोजयत ।

| अ | आ |
|---|---|
| शम्भुः | महर्षिः |
| कविकुलगुरुः | पर्वतराजः |
| कुमारसम्भवम् | कालिदासः |
| अङ्गिरसः | महाकाव्यम् |
| मेना | उमा |

## V रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।

1. शैलः मेनामुखम् उदैक्षत ।
2. शम्भुः ते दुहितरं वृणुते ।
3. त्वं विश्वात्मने भिक्षा परिकल्पिता असि ।

## — योग्यताविस्तारः —

कालिदासगिरां सारं कालिदासः सरस्वती ।
चतुर्मुखोऽथवा साक्षाद्विदुर्नान्ये तु मादृशाः ।।

**- मल्लिनाथः ।**

पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः ।
अद्यापि तत्तुल्यकवेरभावात् अनामिका सार्थवती बभूव ।।

कन्या वरयते रूपं माता वित्तं पिता श्रुतम् ।
बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः ।।

अदत्तेत्यागता लज्जा दत्तेति व्यथितं मनः ।
धर्मस्नेहान्तरे न्यस्ताः दुःखिताः खलु मातरः ।।

**सप्तर्षयः-** मरीचिः, अत्रिः, अङ्गिरस्, पुलस्त्यः, पुलहः, क्रतुः, वसिष्ठः ।

**महाकाव्यलक्षणम् -**

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ।
एकवंशभवा भूपाः कुलजं बहवोऽपि वा ।।

कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ।
नामास्य सर्गोपदेयकथया सर्गनाम तु ।।

- (साहित्यदर्पणः ३१५-३२५)

**अनुशंसितग्रन्थाः**


1. कुमारसम्भवम्-कालिदासः-1.Edited with Commentary Of Mallinatha, English Translation, Notes and Introducion-M.R. Kale-Motilal Banarasidas- New Delhi-Reprint 1995.

2. कुमारसम्भवम्-महाकाव्यम्-सान्वयः-चन्द्रकला हिन्दी व्याख्याता सम्पादकश्च-पं. शेषराजशर्मा रेग्मी-चौखम्भा संस्कृतसंस्थानम्-वाराणसी-Reprint 2005.


* * *

# ७. ज्यौतिषिकस्य दिनम्

(अनूदिता कथा)

## पीठिका

सुप्रसिद्धः आङ्ग्लभाषालेखकः **पद्मश्री** डा. आर्.के. नारायण्महाभागेन विरचितं "An Astrologer's Day" इति लघुकथा अत्र संक्षिप्तरुपेण स्वीकृता । अस्याः कथायाः संस्कृतानुवादकः श्री. अविनाशवर्णः महाभागः। **'सम्भाषणसन्देशः'** इति संस्कृतमासपत्रिकायां (अक्टोबर् -२०१०) एषा कथा प्रकटिता वर्तते ।

**'प्रत्यक्षं ज्यौतिषं शास्त्रम्'** इति उक्त्यनुसारेण भारतीयज्यौतिषशास्त्रं वैज्ञानिकमस्ति । ज्यौतिषस्य लेशमपि अजानन्तः बहवः डाम्भिकाः ज्योतिषिकः कथं जनान् वञ्चयन्ति इति अत्र कथारुपेण चित्रितम् अस्ति ।

**प्रतिदिनमिव तस्मिन्नपि दिने मध्याह्ने कार्यक्षेत्रम् आसाद्य ज्यौतिषिकः स्यूतम् उद्घाट्य कार्योपकरणानि पुरतः स्थापितवान् । तानि केचन कपर्दाः तालपत्राणां बन्धश्च । विपणिमार्गस्य पार्श्वे स्थितस्य वटवृक्षस्य छायायाम् उपविश्य सः ग्राहकान् प्रतीक्षते ।**

**तस्मिन् मार्गे तु आदिनं जनानां प्रवाहः । मार्गे विविधाः आपणाः । कश्चन चणकवणिक् जनान् कन्दुपक्वान् चणकान् क्रेतुं प्रबोधयति । तस्मात् चणकं क्रीत्वा केचन पार्श्वस्थात् ज्यौतिषिकात् स्वभाग्यलेखं पृच्छन्ति । ज्यौतिषिकश्च चणकभर्जनाग्नेः ज्यौतिषा एव सूर्यास्तानन्तरं कार्यं निर्वहति । ज्यौतिषस्य लेशमपि अजानन् अपि 'ज्यौतिषिकः' ऊहाभिः मिश्रितेन सहजज्ञानेन जनानां भविष्यं वदति । तथापि जनाः तस्य वचनैः तुष्यन्ति ।**

**पूर्वं तु स्वप्ने अपि तेन न चिन्तितम् आसीत् यत् कदापि भाविनि जीवने ज्यौतिषिको भवेयम् इति । ग्रामे एव यदि वासः कृतःस्यात् तर्हि सः पूर्वजवत् कृषिक एव अभविष्यत् । परन्तु विधिना अन्यदेव निश्चितमासीत् । बन्धूनपि अनुक्त्वा तेन गृहं परित्यज्य लघुपत्तनम् आगतम् । अनन्यगतिकतया तेन कदाचित् ज्यौतिषिकवृत्तिः आश्रिता अत्र ।**

**त्रियामायाः द्वितीये यामे चणकवणिक् तद्दिनस्य वाणिज्यं समाप्य भर्जनाग्निं शमयित्वा गृहं प्रति प्रस्थितः । एतेन ज्यौतिषिकस्य कार्यक्षेत्रे अन्धकारः आवृतः । अतः सः स्ववस्तूनि स्यूते स्थापयितुम् उद्युक्तः । तावता कश्चित्पथिकः विश्रान्तिम् इच्छन् वटवृक्षम् उपागतः ।**

'अहो, अत्र ग्राहकत्वस्य सम्भवः' इति मत्वा ज्यौतिषिकः पान्थम् अवदत्- 'अत्यन्तं श्रान्तोऽसि। मार्गायासनिवारणार्थं किञ्चित् सम्भाषावहे' इति । एतेन क्रोधाविष्टः पान्थः करं तस्य नेत्रयोः पुरतः गृहीत्वा- 'किमात्मानं ज्यौतिषिकं मन्यसे'? इति अपृच्छत् । ज्योतिषिकः तस्य करं अन्धकारे द्रष्टुं प्रयतमानः-'भवतः भाग्यरेखाः.......' इति वक्तुम् आरभत । मध्ये एव तस्य वचनं खण्डयन् सः पथिकः अवदत्- 'किञ्चित् विशेषं वद' इति ।

'मम वचनैः यदि तुष्टिः स्यात् तर्हि विंशतिरूप्यकाणि दीयन्ताम्' इति अवदत् ज्यौतिषिकः। 'भवतु परम् अहम् असन्तुष्टः चेत् त्वया अपि विंशतिरुप्यकाणि प्रतिदातव्यानि' इति अब्रवीत् पान्थः । यावत् सः धूमवर्तिकां प्राज्वालयत्, तावता मुहूर्तं पथिकस्य मुखं ज्यौतिषिकेण लक्षितम् । ज्यौतिषिकः किञ्चित् व्यग्रतां अन्वभूत् ।

'अहो, विलम्बः जातः गृहं गन्तव्यं मया । भवदीयानि रुप्यकाणि प्रत्यर्पयामि तावत्' इत्युक्त्वा स्यूतं स्वीकृत्य उत्थातुम् उद्युक्तः ज्यौतिषिकः । पथिकः बलेन तस्य हस्तं गृहीत्वा- 'मार्गे गच्छन्तं मां साग्रहम् आहूतवान् त्वम् । इदानीं किं स्वयमेव पलायसे' इति अवदत् । तस्य हस्तनिगडेन बद्धः ज्यौतिषिकः ईषत् अकम्पत । 'अद्य मास्तु । श्वः वदिष्यामि' इति अब्रवीत् । 'नैव । त्वया वचनं दत्वा धनं स्वीकृतं ननु?। मम एकस्यैव प्रश्नस्य उत्तरं वद । किमहं मम अन्वेषणे सफलो भवेयम्' इति क्रोधेन अपृच्छत् पथिकः ।

न न ....इति वदन् ज्यौतिषिकः अवोचत्-'पूर्वं भवतः प्राणसमटम् आपतितम् आसीत्'।

'अहह ! ततः ?'

'छुरिकया विदीर्णः आसीः त्वम्'

'अथ किम् ? पश्य' इति वदन् वक्षसः क्षतः चिह्नं प्रादर्शयत् पान्थः ।

'अनन्तरं त्वं तेन विदीर्णकर्त्रा समीपस्थे कूपे पातितः, त्वं मृत इति परिभाव्य सः क्वापि अगच्छत्'।

'आम् । कूपे पातितं मां यदि कश्चित् पिपासितः पथिकः न अद्रक्ष्यत् तर्हि अहं मृत एव अभविष्यम् । वद, कदा अहं तं पश्येयं ? प्रतीकारं च साधयेयम्' ? इति मुष्टिबन्धनं कुर्वन्सरोषं अवदत् पथिकः ।

'परलोके एव । सः दूरस्थे पत्तने चतुर्भ्यः मासेभ्यः पूर्वं मृतः । अस्मिन् जन्मनि तु त्वं तं पुनःन पश्येः एव' इति तेन उक्ते, सनिर्वेदं शब्दम् अकरोत्पथिकः । ज्यौतिषिकः वचनं अन्ववर्तयत- 'गुरुनायकः इति खलु तव नाम' ?

'मम नाम कथं जानासि' ? इति साश्चर्यं अपृच्छत् पथिकः ।

'अहं सर्वं जानामि गुरुनायक, मम कथनं सावधानं श्रुणु । अद्य रात्रौ एव रेलयानेन ग्रामं प्रति प्रतिष्ठताम् । इतः परं यदि त्वं ग्रामात् निर्गच्छेः तर्हि तव पुनः प्राणसमटं भवेत् इति भाति'।

'किमर्थं पुनः ग्रामान्निर्गच्छेयम् ? तं कदाचित्पश्येयं, स्वहस्ताभ्यामेव तस्य कण्ठं सम्पीड्य हन्याम् इति एकमात्र लक्ष्येण ग्रामात् ग्रामं भ्रमामि । सः तु मम हस्तात् च्युतः' इति वदन् ज्यौतिषिकस्य हस्ते कानिचित् धनपत्राणि निक्षिप्य गुरुनायकः निर्गत ः।

यावज्ज्यौतिषिकेण गृहं प्राप्तं तावता मध्यरात्रः उपस्थितः आसीत् । तस्य पत्नी द्वारे एव स्थित्वा तं प्रतीक्षते स्म । सः भोजनानन्तरं कटे उपविश्य अवदत् - 'अये अद्य मम कश्चन महान् भारः व्यपगतः । प्राणहरणरूपं महापापं कृतवान् अहम् इति चिन्ता एतावन्ति वर्षाणि सर्वदा मां बाधते स्म । तदर्थमेव गृहं परित्यज्य अत्र आगत्य वासः आरब्धः मया । परन्तु सः जीवति इति अद्य ज्ञातम्' ।

'भवान् किं कश्चिन्मारयितुं प्रयत्नमकरोत् पूर्वं कदाचित् ?' इति भयेन अपृच्छत् पत्नी । आम् । मम ग्रामे.........तदा अहं 'यौवनमदोन्मत्तः आसम् । तेन सह कलहः प्रवृत्तः। तदा सा दुर्घटना प्रवृत्ता । इदानीं तु निद्रासमयः' इति उक्त्वा जृम्भां कृत्वा कटे शयनमकरोत् ज्योतिषिकः ।

## शब्दार्थः टिप्पणी

**स्यूतम्** : ಕೈಚೀಲ, ಪೆಟ್ಟಿಗೆ-bag, box

**कपर्दाः** : ಕವಡೆಗಳು-cowries

**विपणिमार्गः** : ಪೇಟೆಯ ರಸ್ತೆ -market road

**आदिनम्** : ಇಡೀ ದಿನ-whole day

**आपणः** : ಅಂಗಡಿ-shop

**चणकः** : ಕಡಲೆ-Bengal gram

**कन्दुपक्कान्** : ಚೆನ್ನಾಗಿ ಹುರಿದ-well fried

**भवेयम्** : विधिलिङ् लकारः उत्तमपुरुषः एकवचनम् ।

**पान्थः** : ದಾರಿಹೋಕ-passer by

**विदीर्णः** : भूतकृदन्तः-पुंलिङ्गः प्रथमा विभक्तिःएकवचनरूपम् ।

**कटः** : ಚಾಪೆ-mat

**जृम्भा** : ಆಕಳಿಕೆ-Yawn-आकारान्त स्त्रीलिङ्गः, प्रथमाविभक्तिः एकवचनरूपम्।

## अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. ज्योतिषिकः कुत्र उपविश्य ग्राहकान् प्रतीक्षते ?
2. चणकान् क्रेतुं कः जनान् प्रबोधयति ?
3. जनाः कस्य वचनैः तुष्यन्ति ?
4. ज्योतिषिकः ग्रामं परित्यज्य कुत्र आगतवान् ?
5. पथिकस्य नामधेयं किं ?
6. ज्योतिषिकः कुत्र शयनमकरोत् ?

**II दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. ज्योतिषिकस्य पूर्वजीवनवृत्तान्तः ।
2. ज्योतिषिकस्य समयप्रज्ञा ।
3. ज्योतिषिक-गुरुनायकयोः संवादः ।

## III पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत ।

1. भवतः भाग्यरेखा..........।
2. मां साग्रहं आहूतवान् त्वम् ।
3. पूर्वं भवतः प्राणसङ्कटम् आपतितम् आसीत् ।
4. मम नाम कथं जानासि
5. इदानीं तु निद्रासमयः ।

## IV रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।

1. मार्गे विविधाः आपणाः आसन् ।
2. ज्यौतिषिकस्य कार्यक्षेत्रे अन्धकारः आवृतः ।

## — योग्यताविस्तारः —

प्रो. आर्.के. नारायण्महाभागस्य 'An Astrologer's day' कथां पठत ।

### सम्भाषणसन्देशः

**सम्भाषणसन्देशः** काचित् मासपत्रिका । बेङ्गलूरुनगरे स्थिता संस्कृतभारती नाम संस्था विंशतिवर्षेभ्यः प्राक् अस्याः प्रकटणम् आरभत । अस्याः पत्रिकायाः प्रमुखम् उद्देश्यं तु संस्कृतभाषा प्रसारः । स्वकार्यम् अविरतं निर्वहन्ती अस्ति पत्रिका एषा । अन्या मासपत्रिका इव अस्यामपि वैचारिक -लेखनानि, कथाः, बालानां कृते एव पृथगेव विभागः, सर्वेषु क्षेत्रेषु विद्यमानपरिस्थितेः चिन्तनम्- एतत्सर्वं सरलया भाषया रुचिरया शैल्या अवबोधयति इयम् । अज्ञानां विज्ञानाम् अपि तोषिणी । एवं संस्कृताध्ययने तद्भाषाप्रेमवर्धने च साहाय्यं ददती अग्रे सरतीति मोदामहे । सर्वे संस्कृतज्ञाः संस्कृताभिमानिनः संस्कृतच्छात्राश्च अस्याः परिधिमिताः भवेयुः इत्याशास्महे ।

## आर्.के. नारायण् (10.10.1906-13.5.2001)

श्री रासिपुरं कृष्णस्वामी नारायण्महाभागः तमिलुनाडु राज्यस्य चेन्नय् नगर समीपस्थे रासिपुरं इति ग्रामे जन्म अलभत । तस्य पिता कृष्णस्वामी महाभागः मैसूरुनगरे शिक्षकः आसीत् । अतः नारायण् अपि मैसूरुनगरमागत्य निवसति स्म । कालक्रमेण मैसूरुनगरमेव अस्य स्वनगरम् अभवत् ।

अस्य महाभागस्य सुप्रसिद्धाः कृतयः :-

1. Swami and Friends
2. The Guide
3. Mr. Sampat
4. The English Teacher
5. Man Eater of Malgudi

## श्री अविनाशवर्णः

अविनाशवर्णः कर्नाटकाभिजनः । यु.एस्.ए.देशे मेरील्याण्ड्विश्वविद्यालये इलेक्ट्रिकल् इञ्जनीयरिङ्ग्विषये पि.एच्.डि.पदवीं सः प्राप्तवान् । अधुना अमेरिकादेशे अरिझोनाराज्ये फियोनक्स्नगरे 'इण्टल्' इत्यस्याः संस्थायाः कार्यालये उद्योगं करोति । पुरा संस्कृतविद्यार्थी भूत्वा, तदभिमानी सन् इदानीं अमेरिकदेशे संस्कृतपरकार्येषु मग्नः अस्ति ।

* * *

# ८. सान्तःपुरः शरणागतोऽस्मि

(बालचरितम् - चतुर्थोऽङ्कः)

## पीठिका

काव्यं श्रव्यं-दृश्यम् इति द्विधा विभक्तम् । यत् काव्यं पठितुं, द्रष्टुमपि शक्यते तादृशं काव्यं दृश्यकाव्यं, यस्य साधारणतया नाटकम् इति प्रसिद्धं नाम ।

अयं पाठ्यभागः महाकविभासविरचितस्य बालचरितनाटकस्य चतुर्थाङ्कात् सङ्गृहीतः । भासनाटकचक्रे त्रयोदश रूपकाणि सन्ति । महामहोपाध्यायैः टि. गणपतिशस्त्रिभिः इमानि प्रकाशितानि। तेषाम् अभिप्राये भासस्य कालः क्रि.पू. पञ्चमं शतकम् ।

(कालियो नाम दुष्टमहोरगः परिवारेण सह यमुनाह्लदं प्रविश्य वसति । कालियविषेण यमुनाजलं विषयुक्तं भवति । गोकुलवासिन्यश्च सर्वाः जीवराशयः महासंकष्टान् अनुभवन्ति । एतद्विषयं ज्ञात्वा दामोदरः विषयुक्तं तत् स्थानम् आगत्य कालियमर्दनं करोति । कालियः कृष्णात् अभयं धन्यतां च प्राप्य यमुनां त्यक्त्वा गतः ।)

### पात्रपरिचयः

| | | |
|---|---|---|
| **समर्षणः** | - | बलरामः |
| **दामोदरः** | - | श्रीकृष्णः |
| **कालियः** | - | महोरगः । |
| **गोपिकाः** | - | गोपकन्यकाः । |
| **वृद्धगोपालकः** | - | यादववृद्धः |

(ततः प्रविशन्ति गोपकन्यकाः)

**सर्वाः** - **मा खलु मा खलु भर्तः ! एतं जलाशयं प्रवेष्टुम् । एषः खलु दुष्टमहोरगकुलावासः।**

**दामोदरः** - **न खलु न खलु विषादः कार्यः ।**

**सर्वाः** - भर्तः समर्षण ! वारय वारय भर्तृदामोदरम् ।

(प्रविश्य)

**समर्षणः** - अलमलं भयविषादाभ्याम् । दर्शितोऽनुरागः ।

**दामोदरः** - सर्वप्रजाहितार्थं द्रुततरं नागं मे वशं करोमि ।

(इति ह्रदं प्रविष्टः)

**सर्वाः** - हा हा धूम उत्थितः ।

**दामोदरः** - अहो ह्रदस्य गाम्भीर्यम् इह हि,

सितेतराभुग्नदुकूलकान्ति
-द्रुतेन्द्रनीलप्रतिमानवीचिम् ।
इमामहं कालियधूमधूम्रां
सान्तर्विषाग्निं यमुनां करोमि ॥ १ ॥

(निष्क्रान्तः)

(ततः प्रविशति वृद्धगोपालकः)

**वृद्धगोपालकः** - हा भर्तः! एष कन्यकाभिर्वार्यमाणो यमुनाह्रदं प्रविष्टः । मा खलु मा खलु साहसं कृत्वा प्रवेष्टुम् । अत्र व्याघ्रा वराहा हस्तिनः पानीयं पीत्वा तत्र तत्रैव विम्रियन्ते । कथं न दृश्यते ? किमिदानीं करोमि? भवतु, इमं तावत् कुम्भपलाशमारुह्य निध्यायामि । (आरुह्यावलोक्य च) हा हा धूम उत्थितः।

**समर्षणः** - पश्यन्तु भवत्यः ।

दामोदरोऽयं परिगृह्य नागं
विक्षोभ्य तोयं च समूलमस्य ।
भोगे स्थितो नीलभुजङ्गमस्य
मेघे स्थितः शक्र इवावभाति ॥ २ ॥

(ततः प्रविशति कालियं गृहीत्वा दामोदरः)

दामोदरः - एष भोः !

निर्भर्त्स्य कालियमहं परिविस्फुरन्तं
मूर्धाश्रितैकचरणश्चलबाहुकेतुः ।
भोगे विषोल्बणफणस्य महोरगस्य
हल्लीसकं सललितं रुचिरं वहामि ।। ३ ।।

सर्वाः - आश्चर्यं भर्तः ! आश्चर्यम् । कालियस्य पञ्च फणानाक्रामन् हल्लीसकं प्रक्रीडति ।

दामोदरः - यावदहमपि पुष्पाण्यपचिनोमि ।

कालियः - आः - लोकालोकमहीधरेण भुवनाभोगं यथा मन्दरं
शैलं शर्वधनुर्गुणेन फणिना यद्वच्च यादोनिधौ ।
स्थूलाखण्डलहस्तिहस्तकठिनो भोगेन संवेष्टितं
त्वामेष त्रिदशाधिवासमधुना सम्प्रेषयामि क्षणात् ।। ४ ।।

वृद्धगोपालकः - (अवतीर्य) साधु भर्तः साधु फालय फालय । अहमपि सहायो भवामि। अहो बिभेमि भर्तः बिभेमि । यावदिमं वृत्तान्तं नन्दगोपाय निवेदयामि।

(निष्क्रान्तः)

दामोदरः - विध्वस्तमीनमकराद्यमुनाह्रदान्ताद्
दर्पोच्छ्रयेण महता दृढमुच्छ्वसन्तम् ।
आशीविषं कलुषमायतवृत्तभोग-
-मेष प्रसह्य सहसा भुवि विक्षिपामि ।। ५ ।।

कालियः - एष भोः !

रोषेण धूमायति यस्य देह-
स्तेनैव दाहं पृथिवी प्रयाति ।
ज्वालावलीभिः प्रदहामि सोऽहं
रक्षन्तु लोकाः समरुद्गणास्त्वाम् ।। ६ ।।

दामोदरः - कालिय, यदि ते शक्तिरस्ति दह्यतां ममैको भुजः ।

कालियः - ह ह ह ....

चतुः सागरपर्यन्तां ससप्तकुलपर्वताम् ।
दहेयं पृथिवीं कृत्स्नां किं भुजं न दहामि ते ।। ७ ।।
हं, तिष्ठेदानीम् एष त्वां भस्मीकरोमि ।

(विषाग्निं मुञ्चति)

दामोदरः - हन्त, दर्शितं ते वीर्यम् ।

कालियः - प्रसीदतु प्रसीदतु भगवान् नारायणः ।

दामोदरः - अनेन वीर्येण भवान् गर्वितः ।

कालियः - प्रसीदतु भगवान्, अज्ञानादतिक्रान्तवान्, सान्तःपुरः शरणागतोऽस्मि ।

दामोदरः - कालिय, किमर्थमिदानीं यमुनाह्लदं प्रविष्टोऽसि ?

कालियः - भगवतो वरवाहनाद् गरुडाद्भीतोऽहमिह प्रविष्टोऽस्मि ।

तदिच्छामि गरुडादभयं भगवत्प्रसादात् ।

दामोदरः - भवतु भवतु ।

मम पादेन नागेन्द्र ! चिह्नितं तव मूर्धनि ।
सुपर्ण एव दृष्ट्वेदमभयं ते प्रदास्यति ।। ८ ।।

अद्यप्रभृति गोब्राह्मणपुरोगासु सर्वप्रजास्वप्रमादः कर्तव्यः ।

कालियः - भगवन्, मद्विषदूषितमिदं जलम् । तदिदानीमेव विषं संहृत्य यमुनाह्लदान्निष्क्रमामि ।

दामोदरः - प्रतिनिवर्ततां भवान् ।

कालियः - यदाज्ञापयति भगवान् नारायणः

(सपरिजनो निष्क्रान्तः)

**श्लोकान्वयः -**

१. इमाम् कालियधूमधूम्रां सान्तः विषाग्निं यमुनां अहं सितेतराभुग्नदुकूलकान्ति द्रुतेन्द्रनीलप्रतिमानवीचिम् करोमि ।

२. अयं दामोदरः तोयं विक्षोभ्य समूलं नागं परिगृह्य अस्य नीलभुजमस्य भोगे स्थितः मेघे स्थितः शक्र इव अवभाति ।

३. अहं मूर्धाश्चितैकचरणःचलबाहुकेतुः परिविस्फुरन्तं कालियं निर्भर्त्स्य विषोल्बणफणस्य महोरगस्य भोगे रुचिरं हल्लीसकं सुललितं वहामि ।

४. यथा लोकालोकमहीधरेण भुवनाभोगं यद्वत् यादोनिधौ शर्वधनुर्गुणेन फणिना मन्दरं तद्वत् स्थूलाखण्डलहस्तिहस्तकठिनः एष भोगेन संवेष्टितं त्वाम् अधुना क्षणात् त्रिदिशाधिवासं सम्प्रेषयामि।

५. विध्वस्तमीनमकरात् यमुना ह्रदात् महता दर्पोच्छ्रयेण दृढम् उच्छ्वसन्तम् आयतवृत्तभोगं कलुषम् आशीविषं एष अहं (दामोदरः) प्रसह्य सहसा भुवि विक्षिपामि ।

६. यस्य देहः रोषेण धूमायति तेनैव पृथिवीं दाहं प्रयाति । सः अहं ज्वालावलीभिः त्वां प्रदहामि। समरुद्गणः लोकाः रक्षन्तु ।

७. ससप्तकुलपर्वतां चतुःसागरपर्यन्तां कृत्स्नां पृथिवीं दहेयम् । किं ते भुजं न दहामि ?

८. हे नागेन्द्र, मम पादेन तव मूर्धनि चिह्नितम् इदं दृष्ट्वा एव सुपर्णः ते अभयं प्रदास्यति ।

## शब्दार्थः टिप्पणी

**ह्रदः** : अगाधजलविस्तारः-ಯಮುನೆಯ ಮಡು-a deep lake a large and deep pool of (yamuna) water .

**द्रुततरम्** : शीघ्रतरम्-ಕ್ಷಿಪ್ರವಾಗಿ, ಬೇಗನೆ-quickly

**सितेतरः** : कृष्णवर्ण-ಕಪ್ಪು-black-सित+इतरः गुणसन्धिः

| | | |
|---|---|---|
| **आभुग्नम्** | : | सम्मिश्रम्-ಮಿಶ್ರಿತವಾದ-mixed with |
| **दुकूलम्** | : | कौशेय वस्त्रम्-ರೇಷ್ಮೆ ಬಟ್ಟೆ-silk cloth |
| **द्रुतेन्द्रनीलः** | : | ಕರಗಿದ ಇಂದ್ರನೀಲಮಣಿ- the gem in its molten state- द्रुत+इन्द्रनीलः । |
| **प्रतिमानम्** | : | तुल्य-ಸಮಾನ ಹೋಲಿಕೆಯುಳ್ಳ-similar |
| **सान्तर्विषाग्निम्** | : | अन्तः=मध्ये, विषाग्निना-विषानलेन, सहितां तां |
| **वीचिः** | : | तरङ्गः-ಅಲೆ-wave |
| **समर्षणः** | : | बलरामः-ಬಲರಾಮ-Balarama |
| **नीलभुजङ्गमः** | : | कृष्णसर्पः - नीलश्चासौ भुजङ्गमः च - कर्मधारयसमासः |
| **भोगः** | : | फणा-ಹೆಡೆ -hood |
| **मूर्धा** | : | मस्तकः-ತಲೆ -head |
| **अञ्चितम्** | : | धृतम्-ಧರಿಸಲ್ಪಟ್ಟ |
| **परिविस्फुरन्तम्** | : | परितः देदीप्यमानम्, भासमानम्-ಸುತ್ತಲೂ ಹೊಳೆಯುತ್ತಿರುವ-glowing around |
| **निर्भर्त्स्य** | : | तिरस्कृत्य-ತಿರಸ್ಕರಿಸಿ-having neglected |
| **विषोल्बणफणस्य** | : | विषेण उल्बणाः फणाः, यस्य सः बहुव्रीहिसमासः । |
| **महोरगः** | : | महान् च असौ उरगः च कर्मधारयसमासः । |
| **रुचिरम्** | : | सुन्दरम्-beautiful |
| **सललितम्** | : | सविलासम्-ಸರಾಗವಾಗಿ-easily |
| **हल्लीसकम्** | : | तन्नामकनृत्यम्-ಹಳ್ಳಿಯಲ್ಲಿ ಗೋಪಾಲಕರು ಆಡುವ ನೃತ್ಯ ವಿಶೇಷ-A special dance performed by cowherds |

**वहामि** : अत्र करोमि इत्यर्थः ।

**यादोनिधौ** : यादांसि, जलजन्तवः, तेषां निधिः=आकरः, तस्मिन्=समुद्रे तन्मध्यगते इति शेषः ।

**शर्वधनुर्गुणेन** : शर्वस्य=ईशस्य, धनुषः=चापस्य, गुणः=रज्जुः, तेन ।

**फणिना** : फणम् अस्य अस्तीति फणी, तेन ।

**संवेष्टितम्** : परिवेष्टितुम्-ಸುತ್ತುವರಿಯಲು-to be covered

**आखण्डलः** : इन्द्रः

**हस्तिहस्तः** : (ऐरावतस्य) शुण्डः-(ಐರಾವತದ) ಸೊಂಡಿಲು-trunk of Airavatha

**त्रिदशाधिवासम्** : यमपुरीवासम्-ಯಮನ ಆವಾಸ-abode of yama

**फालय** : ಕೀಳು (ಹೂವನ್ನು ಕೀಳು)-Pluck the flowers

**यमुनाह्रदान्तात्** : ಯಮುನೆಯ ಮಡುವಿನ ಮಧ್ಯದಿಂದ - from the middle of the deep lake

**दर्पोच्छ्रयेण** : दर्पस्य आधिक्येन-ದರ್ಪಾತಿಶಯದಿಂದ-with utmost arrogance

**उच्छ्वसन्तम्** : निश्वसन्तम्-ಪೂತ್ಕಾರ ಮಾಡುತ್ತಿರುವ-hissing sound

**कलुषम्** : दुष्टम्-ದುಷ್ಟ-wicked

**भुवि** : पृथिव्याम्-ಭೂಮಿಯಲ್ಲಿ-on earth

**आशीविषम्** : सर्पम्-ಸರ್ಪವನ್ನು

**प्रसह्य** : हठात्-ಬಲವಾಗಿ-with force

**विक्षिपामि** : ಎಸೆಯುತ್ತೇನೆ-I will throw-वि+क्षिप्, लट् लकारः उत्तमपुरुषः एकवचनम् ।

**धूमायति** : धूम इवाचरति- ಹೊಗೆಯನ್ನುಗುಳುವಂತ ಕಾಣುವ -smoky appearance

**दाहम्** : ज्वलनम् - ಸುಡುವುದು -burning

**प्रयाति** : गच्छति

**मूर्धाञ्चितैकचरणः** : ಹೆಡೆಯ ಮೇಲೆ ಒಂದು ಪಾದವನ್ನೂರಿರುವ -having stepped a foot on the hood - मूर्ध्नि अञ्चितः एकः चरणः यस्य सः - बहुव्रीहिसमासः

**चलबाहुकेतुः** : ಚಂಚಲವಾದ ಬಾಹುಗಳೇ ಧ್ವಜವಾಗಿರುವಂತಹ -moving hands as the flag - चलः चञ्चलः बाहुः एव केतुः ङ्गस्ङ्ग सः बहुव्रीहिसङ्गासः।

**लोकालोकमहीधरेण** : लोकालोकः नाम पर्वतविशेषः

**भुवनाभोगम्** : प्रपञ्चस्य विस्तारम् - भुवनस्य आभोगम्-षष्ठीतत्पुरुषसमासः।

**यादोनिधिः** : यादसां निधिः - जलजन्तूनाम् आकरः

**स्थूलाखण्डलहस्तिहस्तकठिनः** : स्थूलः विशालकायः आखण्डलस्य यो हस्ती गजः ऐरावतः तस्य हस्तः -शुण्डादण्डःतद्वत् कठिनः- ಸ್ಥೂಲವಾದ ಇಂದ್ರನ ಐರಾವತದ ಸೊಂಡಿಲಿನಂತೆ ಕಠಿಣವಾಗಿರುವ - as hard as the trunk of Airavatha, elephant of Lord Indra.

**विध्वस्तमीनमकरात्** : विध्वस्ताः मीनाः मकराः यस्मिन् तस्मात्।ನಾಶಪಡಿಸಿದ ಜಲಚರಗಳನ್ನುಳ್ಳ -from which all the aquatic animals were destroyed

**आयतवृत्तभोगः** : आयतः वृत्तभोगः यस्य तम् - ವಿಶಾಲವಾದ ವೃತ್ತಾಕಾರದ ಹೆಡೆಯನ್ನು ಹೊಂದಿರುವ -having a large circular hood

**ज्वालावलीभिः** : ಬೆಂಕಿಯ ಜ್ವಾಲೆ-rings of flame-ज्वालानाम् आवल्यः, ताभिः

**मरुद्गणाः** : देवाः

**ममैको** : मम + एको = वृद्धिसन्धिः

**ससप्तकुलपर्वताम्** : सप्तकुलपर्वतेन आवृताम् -surrounded by seven kinds of montains

**कृत्स्नां** : अशेषाम्-ಸಂಪೂರ್ಣ-completely

**सान्तःपुरः** : अन्तःपुर सहितम्

**नागेन्द्रः** : नागानाम् इन्द्रः षष्ठीतत्पुरुषसमासः ।

**सुपर्णः** : गरुडः

**अद्य प्रभृति** : ಇಂದಿನಿಂದ-from today

## अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. गोपकन्यकाः दामोदरं वारयितुं कम् आकारयन्ति ?
2. कः यमुनाह्रदं प्रविष्टः ?
3. वृद्धगोपालकः कमि् आरुह्य यमुनाह्रदं पश्यति ?
4. कस्य भयेन कालियः यमुनां प्रविशति ?
5. सुपर्णः कः ?
6. सर्वप्रजाभिः किं कर्तव्यः इति दामोदरः कालियं वदति ?

**II दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. दामोदरः ।
2. यमुनाह्रदः ।
3. कालियः ।

**III पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत ।**

1. नागं मे वशं करोमि ।
2. दर्शितोऽनुरागः।
3. अहो, बिभेमि भर्तः बिभेमि ।
4. मा खलु साहसं कृत्वा प्रवेष्टुम् !
5. चिह्नितं तव मूर्धनि ।

**IV मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. ...........सललितं रुचिरं वहति ।
2. मेघे स्थितः..........इवावभाति ।
3. एष प्रसह्य सहसा भुवि.......... ।
4. अभयं ते.......... ।

| शक्र, हल्लीसकं, प्रदास्यति, विक्षिपामि |
|---|

Revised Edition 2017

**V संयोजयत**

| अ | आ |
|---|---|
| कालियः | बलरामः |
| दामोदरः | देवेन्द्रः |
| संकर्षणः | कृष्णः |
| स्थूलाखण्डलः | नीलभुजङ्गमः |

## — योग्यताविस्तारः —

**भाससमस्या -** भासमहाकावेः देश-काल-ग्रन्थानां विषये विमर्शकानां मध्ये एकाभिप्रायः अद्यापि नास्ति । अतः सर्वः भासविचारः 'भाससमस्या' इत्येव प्रथितः ।

**भासस्य कृतयः-**

१. अभिषेकनाटकम् ।

२. प्रतिमानाटकम् ।

३. मध्यमव्यायोगः ।

४. दूतवाक्यम् ।

५. दूतघटोत्कचम् ।

६. कर्णभारम् ।

७. ऊरुभङ्गम् ।

८. पञ्चरात्रम् ।

९. प्रतिज्ञायौगन्धरायणम् ।

१०. स्वप्नवासवदत्तम् ।

११. अविमारकम् ।

१२. चारुदत्तम् ।

१३. बालचरितम् ।

**भासप्रशस्ति वाक्यं श्लोकः च-**

प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य क्रियायां कथं परिषदोऽस्याः बहुमानः ? **- मालविकाग्निमित्रे कालिदासः ।**

सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः ।
सपताकैर्यशो लेभे भासो देवकुलैरिव ।।

**- हर्षचरिते बाणः**

**दशरूपकाणि-**

नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः ।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रुपकाणि दश ।।

**अनुशंसितग्रन्थाः**

1. ಕನ್ನಡ ಭಾಸ ಮಹಾಸಂಪುಟ-ಎಸ್.ವಿ. ಪರಮೇಶ್ವರ ಭಟ್ಟ -ಶಾರದಾ ಪ್ರೆಸ್, ಮಂಗಳೂರು -1975
2. भासनाटकचक्रम् -सं. सि.आर्. देवधर-Oriental Book Agency Poona -1945
3. महाकविः भासः-आचार्यः श्रीरामचन्द्रमिश्रः-Chowkhambha Vidyabhavan, Varanasi -1976
4. भासनाटकचक्रम्-डा. सुधाकरमालवीयः-कृष्णदास अकाडमी, वारणासी. १९७९
5. ಭಾಸ ಮಹಾಕವಿ-ಸಿ.ಕೆ. ವೆಂಕಟರಾಮಯ್ಯ-1937

* * *

# ९. सूक्तिकुसुमानि

(विविधसुभाषितग्रन्थेभ्यः सङ्गृहीतानि)

## पीठिका

**'सुन्दरं भाषितम्', 'सम्यक् भाषितम्', 'शोभनं भाषितम्'** वा इति सुभाषितम् ।

काव्यनाटकादीनां प्रकाराः इव सुभाषितान्यपि परिगणितानि विशिष्टकाव्यप्रकारत्वेन । अर्थगम्भीरयुक्तः चमत्कृतिजनकः श्लोकः एकैकोऽपि मुक्तकमिति परिभावितोऽस्ति । यथा मुक्तकं स्वर्णाभरणस्य शोभां वर्धयति तथैव सुभाषितान्यपि जीवनस्य शोभां वर्धयन्ति । अपि च एकैकमपि सुभाषितं एकैकं वस्तु समग्रतया सुन्दरतया सम्यक् निरूपयति ।

एतानि सुभाषितानि मनोज्ञैः उदाहरणैः चेतोहारीणि च भवन्ति । एतानि जीवनस्य विविधेषु क्षेत्रेषु मार्गदीपा इव मार्गदर्शनं कुर्वन्ति ।

अस्मिन् पाठ्यभागे अनेकेषां सुभाषितकर्तॄणां कानिचन सूक्तिपुष्पाणि एकत्र सङ्ग्रथितानि।

**अलब्धमीहेद् धर्मेण लब्धं यत्नेन पालयेत् ।**<br>**पालितं वर्धयेन्नित्यं वृद्धं पात्रेषु निक्षिपेत् ।। १ ।।**

**तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।**<br>**एतानि तु सतां गेहे नोच्छिद्यन्ते कदाचन ।। २ ।।**

**गिरिर्महान् गिरेरब्धिः महानब्धेर्नभो महत् ।**<br>**नभसोऽपि महत् ब्रह्म ततोऽप्याशा गरीयसी ।। ३ ।।**

**चलन्ति गिरयः कामं युगान्तपवनाहताः ।**<br>**कृच्छ्रेऽपि न चलत्येव धीराणां निश्चलं मनः ।। ४ ।।**

**आहारार्थं कर्मकुर्यादनिन्द्यं**<br>**कुर्यादाहारं प्राणसन्धारणार्थम् ।**<br>**प्राणाः सन्धार्याः तत्त्वविज्ञानहेतोः**<br>**तत्त्वं विज्ञेयं येन भूयो न जन्म ।। ५ ।।**

सर्पाः पिबन्ति पवनं न च दुर्बलास्ते
शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।
कन्दैः फलैर्मुनिवरा क्षपयन्ति कालं
सन्तोष एव पुरुषस्य परं निदानम् ।। ६ ।।

पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।। ७ ।।

दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने
प्रीतिः साधुजने नयो नृपजने विद्वज्जने चार्जवम्।
शौर्यं शत्रुजने क्षमा गुरुजने नारीजने पूज्यता
ये चैवं पुरुषाः कलासु कुशलाः तेष्वेव लोकस्थितिः ।। ८ ।।

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परादेवता
विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः ।। ९ ।।

शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गौर्गर्दभौ ।
व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ।। १० ।।

**श्लोकान्वयः -**

१. अलब्धं धर्मेण ईहेद्, लब्धं यत्नेन पालयेत्, पालितं नित्यं वर्धयेत्, वृद्धं पात्रेषु निक्षिपेत् ।

(याज्ञवल्क्यस्मृतिः-१-३१७)

२. तृणानि, भूमिः, उदकम् (एतानि त्रीणि), (अपि च) चतुर्थी सूनृता वाक्, एतानि तु सतां गेहे कदाचन न उच्छिद्यन्ते । (महाभारते उद्योग पर्वम्-३४-३६)

३. गिरिः महान्, गिरेः अब्धिः (महान्) अब्धेः नभः महत् । नभसोऽपि महत् ब्रह्म, ततोऽपि गरीयसी आशा । (कुवलयानन्दः-अ)

४. युगान्तपवनाहताः गिरयः कामं चलन्ति । (किन्तु) धीराणां निश्चलं मनः कृच्छ्रेऽपि न चलत्येव । (चण्डकौशिकः-क्षेमीश्वरः-४-३४)

५. आहारार्थम् अनिन्द्यं कर्म कुर्यात्, प्राणसन्धारणार्थम् आहारं कुर्यात्, तत्त्वविज्ञानहेतोः प्राणाः सन्धार्याः, येन जन्म भूयः न (भवति, तथा) तत्त्वं विज्ञेयम् ।

(सुभाषितरत्नभाण्डागारः-नारायणराम आचार्यः)

६. सर्पाः पवनं पिबन्ति (तथापि) ते न दुर्बलाः, शुष्कैः तृणैः वनगजाः बलिनः भवन्ति । कन्दैः फलैः मुनिवराः कालं क्षपयन्ति, (अतः) पुरुषस्य सन्तोष एव परं निदानम् ।

(पञ्चतन्त्रम्- मित्रसंप्राप्तिः-१५९)

७. इदं सन्मित्रलक्षणम् - पापात् निवारयति, हिताय योजयते, गुह्यं निगूहति, गुणान् प्रकटीकरोति, आपद्गतं च न जहाति, काले (सदुपदेशं धनं वा) ददाति-एवं सन्तः प्रवदन्ति ।

(नीतिशतकम्-भर्तृहरिः-७०)

८. स्वजने दाक्षिण्यं, परिजने दया, दुर्जने सदा शाठ्यं, साधुजने प्रीतिः, नृपजने नयः, विद्वज्जने च आर्जवम्, शत्रुजने शौर्यं, गुरुजने क्षमा, नारीजने पूज्यता, एवं ये च पुरुषाः कलासु कुशलाः लोकस्थितिः तेषु एव (स्थिता) । (नीतिशतकम्-भर्तृहरिः-२०)

९. विद्या नाम नरस्य अधिकं रूपम्, प्रच्छन्नगुप्तं धनम्, विद्या भोगकरी, यशः सुखकरी, विद्या गुरूणां गुरुः । विदेशगमने विद्या बन्धुजनः, विद्या परादेवता, विद्या राजसु पूज्यते, न तु धनम् (अतः) विद्याविहीनः पशुः (पशुसमानः) । (नीतिशतकम्-भर्तृहरिः-१८)

१०. हुतभुक् जलेन वारयितुं शक्यः, सूर्यातपः छत्रेण, समदः नागेन्द्रः निशिताङ्कुशेन, गौर्गर्दभौ दण्डेन, व्याधिः भेषजसङ्ग्रहैः, विषं विविधैः मन्त्रप्रयोगैः (वारयितुं शक्यम्), (एवं) सर्वस्य शास्त्रविहितम् औषधम् अस्ति (किन्तु) मूर्खस्य औषधं नास्ति ।(नीतिशतकम्-भर्तृहरिः-०९)

## शब्दार्थः टिप्पणी

**वृद्धम्** : अभिवृद्धम्-ಹೆಚ್ಚಾದ-increased

**वर्धयेन्नित्यं** : वर्धयेत्+नित्यम्-अनुनासिकसन्धिः

**पात्रेषु** : योग्येषु-ಯೋಗ್ಯಜನರಲ್ಲಿ-among worthy people

**तृणानि** : तृणनिर्मितकटः-ಹುಲ್ಲಿನ ಚಾಪೆ-mat made of grass

**अब्धिः** : सागरः-ಸಮುದ್ರ-ocean

**नभः** : आकाशः-ಆಕಾಶ-sky-नपुंसकलिङ्गशब्दः - नभः नभसी नभांसि

**कृच्छ्रः** : कठिणसमयः-ಕಷ್ಟದ ಸಮಯ-at difficult times

**आशा** : इच्छा-ಆಸೆ-desire

**अनिन्द्यम्** : न निन्द्यम्-नञ्तत्पुरुषसमासः

**प्राणाः** : असवः-ಪ್ರಾಣಗಳು-vital energy-प्राणाः नित्यपुंलिङ्गबहुवचनरूपम्।

**कुर्यात्** : विधिलिङ् लकारः प्रथमपुरुषः एकवचनम् । कुर्यात् कुर्यातां कुर्युः

**आर्जवः** : सरलता-ಸರಳತೆ-simplicity

**प्राणसन्धारणार्थम्** : प्राणानां सन्धारणार्थम्-षष्ठीतत्पुरुषसमासः

**भूयः** : नपुंसकलिङ्गः प्रथमाविभक्तिः, द्वितीयाविभक्तिः एकवचनम् ।

**विज्ञेयः** : वि उपसर्गपूर्वक ज्ञा धातोः विध्यर्थक कृदन्तः प्रथमाविभक्तिः, द्वितीयाविभक्तिः एकवचनम् ।

**दाक्षिण्यं** : सौजन्यम्-ಎಲ್ಲರಲ್ಲೂ ಸಮಾನವಾದ ನಡವಳಿಕೆ-politeness, kind-ness, curticy

**निदानम्** : आरोग्यस्य कारणम्-ಆರೋಗ್ಯದ ಕಾರಣ-Reason for good health

| | | |
|---|---|---|
| **करोति** | : | कृ धातोः लट्लकारः प्रथमपुरुषः एकवचनम् । |
| **शौर्यम्** | : | (साहसं) धीरता-ಶೌರ್ಯ-valour |
| **प्रच्छन्नम्** | : | रहस्यम्-ಬಚ್ಚಿಟ್ಟ-hidden |
| **नागेन्द्रः** | : | नाग+इन्द्रः-गुणसन्धिः, नागानाम् इन्द्रः =षष्ठीतत्पुरुषः, नागः=गजः |
| **सूर्यातपः** | : | सूर्यतापः-ಬಿಸಿಲು-Hot sun |
| **समदः** | : | ಮದದಿಂದ ಕೂಡಿದ-intoxicated elephant-मदेन सह वर्तत इति । |
| **वारयितुम्** | : | वृञ् धातोः तुमुन्नन्ताव्ययम् । |
| **अमुशः** | : | सृणिः-ಅಂಕುಶ-a goad |

**विशेषार्थः - २ तृणानि भूमिरुदकम् -- ।** उपवेशनार्थं भूमिः, शयनार्थं कटः, पानार्थं जलम्, सुसंस्कृता वाक् च सज्जनानां गृहे सर्वदा मिलन्ति ।

## अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. अलब्धं कथम् ईहेत् ?
2. केषां मनः निश्चलम् ?
3. नभसोऽपि किं महत् ?
4. कन्दैः फलैः के कालं क्षपयन्ति ?
5. तृणैः के बलिनः भवन्ति ?

**II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. सुभाषितोक्तरीत्या लोकस्थितिः कीदृशी ?

2. सुभाषिते विद्या कथं प्रशंसिता ?

3. सुभाषितकारः मूर्खं कथं वर्णयति ?

**III मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. चलन्ति.........कामम् ।

2. सर्पाः............पिबन्ति ।

3. ..........निश्चलं मनः न चलति ।

4. लब्धं यत्नेन............।

5. विद्या.........पूज्यते ।

| पवनं, धीराणां, गिरयः, राजसु, पालयेत् |
|---|

**IV संयोजयत ।**

| अ | आ |
|---|---|
| विद्या | गरीयसी |
| जलनिधिः | सागरः |
| सन्तोषः | परादेवता |
| आशा | आनन्दः |

**V पाठनाम उल्लिख्य अधोनिर्दिष्टसङ्ख्याकानां श्लोकानाम् अनुवादं कन्नडभाषया आङ्ग्लभाषया वा कुरुत । श्लोकसङ्ख्याः - १, २, ३, ४, ७**

## — योग्यता विस्तारः —

सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा त्यजेत् सुखम् ।।
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम् ।

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ।।

यथा चित्तं तथा वाचः यथा वाचः तथा क्रिया ।
चित्ते वाचि क्रियायां च साधूनामेकरूपता ।।

लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटन् शशविषाणमासादयेत् ।
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ।।

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ।।

अनुगन्तुं सतां वर्त्म कृत्स्नं यदि न शक्यते ।
अल्पमप्यनुगन्तव्यं मार्गस्थो नावसीदति ।।

**भूयः** : अधिकः, विपुलं, बहुसङ्ख्याकः, पुनः (पुं) भूयान् (स्त्री) भूयसी, (न) भूयः-ಮತ್ತೆ-again and again, more and more भूयोभूयः अव्ययम्-ಮತ್ತೆ ಮತ್ತೆ-again and again (indeclinalbe)

**सुप्रसिद्धाः सुभाषितग्रन्थाः-**

| | | |
|---|---|---|
| **१. सुभाषितरत्नसन्दोहः** | अमितगतिः | क्रि.श.१० शतकम् । |
| **२. दृष्टान्तकलिका** | कुसुमदेवः | कि.श.११ शतकम् |
| **३. कवीन्द्रवचनसमुच्चयः** | विद्याधरः | कि.श.१२ शतकम् |
| **४. सदुक्तिकर्णामृतम्** | श्रीधरदासः | कि.श.१२ शतकम् |
| **५. शान्तिशतकम्** | शिल्हणः | कि.श.१२ शतकम् |
| **६. सूक्तिमुक्तावलिः** | जल्हणः | कि.श.१३ शतकम् |
| **७. सूक्तिरत्नाकरः** | सिद्धचन्द्रङ्कणिः | कि.श.१३ शतकम् |

| | | |
|---|---|---|
| **८. शार्ङ्गधरपद्धतिः** | शार्ङ्गधरः | कि.श.१४ शतकम् |
| **९. सुभाषितसुधानिधिः** | सायणाचार्यः | कि.श.१५ शतकम् |
| **१०. प्रसन्नसाहित्यरत्नाकरः** | नन्दनः | कि.श.१५ शतकम् |
| **११. सुभाषितावली** | वल्लभदेवः | कि.श.१५ शतकम् |
| **१२. सूक्तिरत्नावली** | विजयसेनसूरिः | कि.श.१६ शतकम् |
| **१३. प्रस्तावरत्नाकरः** | हरिदासः | कि.श.१६ शतकम् |
| **१४. सुभाषितहारावली** | हरिकविः | कि.श.१७ शतकम् |
| **१५. सूक्तिसुन्दरः** | सुन्दरदेवः | कि.श.१७ शतकम् |
| **१६. पद्यामृततरङ्गिणी** | हरिभास्करः | कि.श.१८ शतकम् |

**अनुशंसितग्रन्थाः**


1. सुभाषितरत्नभाण्डागारम्-काशीनाथशर्मा-Edited by Narayana Ram Acharya-चौखाम्बा-संस्कृत-सीरीज आफीस, वाराणसी-1998.

2. सुभाषितत्रिशती-भर्तृहरिः ।


** *

# १०. सन्मित्रम्

(प्राचीनकथा)

## पीठिका

एषा कथा 'संस्कृत सामान्यज्ञानम्' नामककथाग्रन्थात् सङ्ग्रहरूपेण स्वीकृता ।

कथाप्रसङ्गेऽस्मिन् कदाचित् राजमन्त्रिणोः वादोऽजायत । मन्त्री सङ्कष्टे आपतति । तदा सः पूर्वं तेन साहाय्यं सवीकृतवतां त्रयाणां मित्राणां गृहं क्रमशः गच्छति । तत्र 'आपत्सु मित्रं जानीयात्' इति उक्तिः प्रमाणीकृता भवति । 'विद्वान् सर्वत्र पूज्यते' इति उक्त्यनुसारम् अद्यतन काले सन्मित्रस्य महत्त्वं ज्ञातुम् एषा कथा साहाय्यिका भवति ।

**आसीत् प्राच्ये जनपदे वैशाली नाम पुरी । तत्र सेनजिदभिदो राजा भुवं प्रशशास । अयं महीपः वीरो धीरश्चासीत् । अस्य आस्थाने सुविज्ञः देवव्रतो नाम सत्यनिष्ठः अमात्यः आसीत्। देवव्रतः तादृशो मतिमानविद्यत, यत् किमपि कार्यं सः सहसा न समपादयिष्यत् । सेनजिदस्मिन् सुतरामस्निह्यत । सः मन्त्रिणः बुद्धिचातुर्येण सर्वकार्येषु यशः प्राप्नोत् । अतः राजा ससुखं सानन्दं कालं यापयति स्म ।**

**को जानाति विधेः नियमम् ! एकदा राजसभायां पण्डितानां कविगणानां शास्त्रकोविदानां समेषां च सभासदां शास्त्रालापः प्रावर्तत । तेषु वादो विवृद्धः। सचिवः वदति स्म 'विदुषो राज्ञश्च समानता न भवितुं शक्यते । विद्वान् विद्या प्रभावेण स्वदेशे विदेशे च अर्चितो भवति, न च तथा महीपालः। महीपालस्य पूजा स्वदेशे सम्भवति' इति । मन्त्रिणः वचनं नाङ्गीकुर्वन् सेनजिदवोचत् 'राजानमन्तरा न विद्वान् सपर्यामुपभोक्तुमर्हति, प्रदर्श्यतां तावत् स्वविषयकं प्रामाण्यम्' इति । 'बाढम्' इत्युक्त्वा सचिवः मौनमतिष्ठत् । परं राजा याथार्थ्यम् न विचारयामास । अविलम्बेन समादिदेश च अमात्यं राज्यात् बहिर्गन्तुम् । तदनु सचिवः प्रस्थितः।**

**एतस्मिन् समष्टसमये आश्रयम् इच्छन् सचिवः देवव्रतः स्वसुहृदः स्नेहाधीनस्य वाचिकमित्रस्य सदनं सत्वरम् अगच्छत् । सुहृदा सह देवव्रतस्य महत्तमः सम्बन्ध आसीत् । यद्यपि अस्य श्रीमतो वेश्मनि जीवनपर्यन्तं निवसेत् , तथाऽपि तं न विज्ञातुम् अर्हेद् राजा । किन्तु**

कतिपयदिनानन्तरं देवव्रतः सन्मित्रस्य तस्य राजद्रोहभयं ज्ञात्वा गृहं विहाय तस्य उपकारं स्मरन् द्वितीयमित्रस्य सोमदेवस्य गृहम् अगच्छत् ।

सोमदेवोऽपि देवव्रतेन सह भोजनपानादिभिः सुखमासादयति स्म । वचनासनप्रदानेन सोमदेवेन देवव्रतः समादृतः । 'नूनमहं विरोधेऽपि राज्ञः भवत्साहाय्यं आचरिष्यामि । किमहम् एतावदपि कर्तुं न शक्नोमि ?' इति । मित्रस्य महदौदार्यं मन्यमानः देवव्रतः साधुवादं दत्तवान् । परम् अचिरमेव सोमदेवेन मन्त्री अभाणि - 'अहो मित्र, नाहं विस्मरामि तवोपकारम् । मम गृहे भवतः वासः यदि राज्ञा विदितश्चेत् , नूनं मां शूलम् आरोपयिष्यति । राजादेशोल्लङ्घकस्य आश्रयप्रदानम् अपराधः इति अहं जाने । अतः सत्वरं मम गृहं त्यक्त्वा अन्यत्र प्रयातु 'इति व्यजिज्ञपत् ।

सोमदेवस्य वचनं श्रुत्वा तस्य गृहं विहाय प्रस्थितः देवव्रतः स्वदुःखम् आक्रोशं च सोढुं न शशाक । 'अहो धिङ् माम् इमौ च स्वार्थिनौ सखायौ' । नान्यत्र किमपि हितैषिगणमनुपश्यामि इति विचारयन्नेव, मार्गमध्ये देवव्रतः बाल्यस्नेहितं चन्द्रधरम् अपश्यत् । अयं न मया कदापि सम्मानितोऽभवत् । दर्शनमात्रेणैवासौ भृशमानन्द । निराशाभिरावर्ततो देवव्रतः कथञ्चित् सख्युः चन्द्रधरस्य निलयमाविवेश । सः आसन-अर्घ्यपाद्यादिभिः संपूजितः । मित्रदर्शनात् चन्द्रधरस्य सन्तोषः तु वर्णनातीतः । 'विविधार्थपरम्परया प्रमथिताः पुरुषाः पृथक् पृथक् प्रयोगेण वञ्चयन्ति स्नेहान्धान् इतरजनान् । समयानुसारमेव व्यवहरन्ति जागतिका व्यक्तयः । नाभिलषन्ति इतरेषामपि कल्याणम्, नूनमस्ति अनर्थपरम्परा खल्वियं जगतीतले' इति स्मरन्नेव देवव्रतः तस्य असहायकतां प्राकटयत् । राजाज्ञां तथा स्वसख्योः विचारमपि अकथयत् । इदं श्रुत्वा राज्ञः कोपम् अविगणयन्नसौ चन्द्रधरः सर्वविधं तं सान्त्वयामास । उक्तं च 'सखे ! विद्वत्सखसंरक्षणाय मम प्राणा अपि यदि गच्छेयुस्तदापि नाहं स्वकर्तव्यपथात् भ्रष्टो भविष्यामि । परिजनाश्च मे स्वसौभाग्यमाकलयन्ति मित्रार्थे जीवितोत्सर्गेण । वस्तुतस्तु मित्रमेकमेव भवति प्रधानं जगतीतले' इति । देवव्रतः सख्युः चन्द्रधरस्य सौहार्दभावेन भृशमतुष्यत् । क्रमेण देवव्रतःप्रजानां गौरवपात्रम् अभजत । असौ राजापि चन्द्रधरस्य प्राणार्पणात्मकमनोभावं ज्ञात्वा आनन्दमवाप । राजा सेनजित् देवव्रतमन्तरा राजकार्यं सञ्चालयितुं नाशक्नोत् । अपि च स्वयमेव चन्द्रधरस्य गृहम् आगत्य, देवव्रतं क्षमाम् अयाचत तथा च मनसि 'आः ! ममेदृशी प्रज्ञा ?' इति समादरेण देवव्रतं समाश्वासयामास ।

**देवव्रतः चन्द्रधरस्य उपकारं पुनः पुनः स्मृत्वा तं स्वगृहम् आमन्त्र्य राज्ञा सह राजभवनम् अगच्छत् ।**

## शब्दार्थः टिप्पणी

| | | |
|---|---|---|
| **प्राच्ये** | : | पूर्वस्यां दिशि-ಪೂರ್ವ ದಿಕ್ಕಿನಲ್ಲಿ- In the Eastern direction |
| **प्रशशास** | : | अपालयत्-ಆಳಿದನು-Ruled over लिट्लकारः प्रथमपुरुषः एकवचनम् । |
| **सुविज्ञः** | : | ज्ञानी-बुद्धिमान्-ಬುದ್ಧಿವಂತ-Intelligent |
| **प्राप्नोत्** | : | ಪಡೆದನು-got, प्र+आप्+लङ्लकारः प्रथमपुरुषः एकवचनम् । |
| **प्रावर्तत** | : | प्र+वृत् लङ्लकारः प्रथमपुरुषः एकवचनम् । (आत्मनेपदी) |
| **उपभोक्तुम्** | : | ಅನುಭವಿಸಲು-to enjoy-उप+भुज् तुमुन्नन्ताव्ययम् । |
| **मनः** | : | मनस् नपुंसकलिङ्गः प्रथमा, द्वितीयविभक्तिः एकवचनम् । |
| **चकार** | : | लिट्लकारः प्रथमपुरुषः एकवचनम् । |
| **आहूय** | : | ಆಹ್ವಾನಿಸಿ-Having invited-आ+ह्वय्-ल्यबन्ताव्ययम् । |
| **राजद्रोहम्** | : | ರಾಜದ್ರೋಹ-tyrant-राज्ञे द्रोहम्-चतुर्थी तत्पुरुष समासः । |
| **जाने** | : | ನನಗೆ ತಿಳಿದಿದೆ -I know-ज्ञा धातोः लट्लकारः उत्तमपुरुषः एकवचनम्। |
| **प्रयातु** | : | ಹೋಗು-go-गच्छतु प्र+या लोट्लकारः प्रथमपुरुषः एकवचनम् । |
| **प्रस्थितः** | : | प्र+स्था-भूतकृदन्तः पुंलिङ्गः प्रथमाविभक्तिः एकवचनम् । |
| **शशाक** | : | शक्तः अभवत्-ಸಮರ್ಥನಾದನು-was able-लिट्लकारः प्रथमपुरुषः एकवचनम् । |

| | | |
|---|---|---|
| **विचारयन्** | : | ವಿಚಾರ ಮಾಡುತ್ತಾ-thinking over-वर्तमान कृदन्तः पुंलिङ्गः प्रथमाविभक्तिः एकवचनम् । |
| **समादरेण** | : | ಗೌರವಯುತವಾಗಿ-with respect-आदरेण सहितम्-बहुव्रीहिसमासः । |
| **अस्निह्यत्** | : | ಅತ್ಯಂತ ಸ್ನೇಹಪಾತ್ರ-very friendly |
| **निनाय** | : | ತೆಗೆದುಕೊಂಡುಹೋದನು-took away-लिट्लकारः प्रथमपुरुषः एकवचनम् । |
| **निशम्य** | : | ಕೇಳಿ-having heard-नि + शम्+ल्यबन्ताव्ययम् । |
| **समेषाम्** | : | सर्वेषाम्-ಎಲ್ಲರ-of all |
| **विवृद्धः** | : | ಹೆಚ್ಚಾದ -increased |
| **अन्तरा** | : | ಇಲ್ಲದೆ -without |
| **प्रामाण्यम्** | : | ಸಾಕ್ಷಿ -proof |
| **समपादयिष्यत्** | : | अलभत-ಪಡೆದನು -got- पद् धातोः लृङ्लकारः प्रथमपुरुषः एकवचनम्। |

१. **ज्ञा-धातु लट् परस्मैपदी**

| | | | |
|---|---|---|---|
| प्र.पु | जानाति | जनीतः | जानन्ति |
| म.पु | जानासि | जानीथः | जानीथ |
| उ.पु | जानामि | जानीवः | जानीमः |

२. **नी- लिट् परस्मैपदी**

| | | | |
|---|---|---|---|
| प्र.पु | निनाय | निन्यतुः | निन्युः |
| म.पु | निन्यिथ | निन्यथुः | निन्य |
| उ.पु | निनाय | निन्यिव | निन्यिम |

## अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. सेनजिद्राजस्य सचिवस्य नाम किम् ?
2. राजा केन यशः प्राप्नोत् ?
3. शास्त्रालापः कुत्र प्रावर्तत ?
4. महीपालस्य पूजा कुत्र सम्भवति?
5. देवव्रतस्य कति मित्राणि आसन् ?
6. सन्मित्रस्य नाम किम् ?

**II दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. सेनजित् तथा देवव्रतस्य सम्भाषणं लिखत ।
2. देवव्रतेन अनुभूतां कष्टपरम्परां वर्णयत ।
3. देवव्रत-चन्द्रधरयोः मैत्रीं वर्णयत ।

**III पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत ।**

1. महीपालस्य पूजा स्वदेशे सम्भवति ।
2. प्रदर्श्यतां तावत् स्वविषयकं प्रामाण्यम् ।
3. नाहं विस्मरामि तवोपकारम् ।
4. मित्रमेकमेव भवति प्रधानं जगतीतले ।
5. अहो धिङ् माम् इमौ स्वार्थिनौ सखायौ ।
6. आः ममेदृशी प्रज्ञा ?

**IV मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. राजा ससुखं सानन्दं कालं............।
2. नाभिलषन्ति इतरेषामपि ..... ।
3. नूनमहं विरोधेऽपि राज्ञः.......आचरिष्यामि ।

| |
|---|
| भवत्साहाय्यं, यापयति स्म, कल्याणम् |

## — योग्यता विस्तारः —

विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ।।

धीराणां भूषणं विद्या मन्त्रीणां भूषणं नृपः ।
भूषणं च पतिः स्त्रीणां शीलं सर्वस्य भूषणम् ।।

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ।।

* * *

# ११. वचनामृतम्

(कर्णाटस्य वचनकर्तृणां वचनानि)

## पीठिका

क्रि.श.द्वादशशतमानः भारतीयेतिहासे, प्रमुखतया कर्णाटकेतिहासेऽतीव प्रमुखः । सर्वैः विदितमेवैतद्यत् कालेऽस्मिन् सामाजिकक्रान्तिरभवदिति । बसवण्णमहोदयेन प्रतिपादितं यत् 'प्रत्येकोऽपि मानवः मोक्षं साधयितुमर्हः । अत्र जातिः न प्रमुखा । कर्मणः द्वारैव साध्यमेतद्भवति इति। **'कायकवे कैलास'** इति तस्य उद्घोषणम् । एषः स्वमतं सरलया जनानां संवहनभाषया कन्नडभाषया प्रत्यपादयत् । एतदान्दोलनं तत्काले बहु प्रसिद्धमभवत् । वेदोपनिषत्सु यानि नित्योपयोगजीवनमौल्यानि सन्ति, तानि सरलया भाषया लघुरचनाभिः जनानबोधयत् । **वचन**मिति तेषां नाम । अस्या बोधनायाः सारल्येन सहस्रशो जनाः आकृष्टा भूत्वा पन्थानमिदमन्वगमन् । वचनानि व्यरचि अनेकवचनकर्तृभिः । एषु बसवण्णः, अल्लमप्रभुः, अक्कमहादेवी, जेडरदासिमय्यः, चेन्नबसवण्णः, इत्यादयो प्रमुखाः ।

एतेषां प्रामुख्यमवगम्य एतानि वचनानि संस्कृतेऽप्यनूद्य सम्पादितं डा ।। एम्. एम्. कलबुर्गी महोदयेन कार्णाटक्यां, डा ।। एच्.वि.नागराजराव् महोदयेन संस्कृतभाषायाञ्च । तस्मात् **'वचनम्'** इति ग्रन्थात् कृतज्ञतापूर्वकं कानिचन वचनानि उद्धृतानि ।

**१. मा चोरय मा मारय मा कथयासत्यं**
**मा क्रुध्य मा जुगुप्सस्तव अन्येभ्यः ।**
**मा श्लाघस्व आत्मानं मा च निन्द अपरान्**
**इयमेव अन्तरङ्गशुद्धिः इयमेव बहिरङ्गशुद्धिः**
**इयमेव च अस्मदीयकूडलसङ्गमप्रसादनस्य पद्धतिः ।।**

**२. आर्य कोऽयं धर्मो नाम यत्र नास्ति दया**
**दयैव अपेक्ष्यते सकलेष्वपि प्राणिषु ।**
**आर्य दयैव धर्मस्य मूलम् ।**
**असत्यां च तस्यां कूडलसङ्गार्यो न प्रसीदत्यार्य ।।**

३. अन्नदाने पुण्यमस्ति, वस्त्रदाने च धर्मः,
धनप्रदाने तु श्रीर्भवति ।
त्रिकरणशुद्धो ध्यायति चेत्
मुक्तो भवति
कूडलचेन्नसङ्गार्ये ।

४. कुत्रत्यो रसालः ? कुत्रत्यः कोकिलः!
कुतः कुतोऽयं सम्बन्धः ?
पर्वतचूलस्थम् आमलकम् ! सागरस्थितो ननु लवणः।
कुतः कुतोऽयं सम्बन्धः ?
मम च गुहेश्वरलिङ्गस्य च
कुतः कुतोऽयं सम्बन्धः ?

५. भानुरिव ज्ञानं
भानुकिरणा इव भक्तिः
भानुं विना न सन्ति किरणाः
किरणान् विना नास्ति भानुः ।
ज्ञानं विना भक्तिः भक्तिं विना ज्ञानं
कथं भवेत् चेन्नमल्लिकार्जुन ।।

## शब्दार्थः टिप्पणी

**मा चोरय** : ಕಳ್ಳತನ ಮಾಡಬೇಡ-do not steal

**मा मारय** : ಕೊಲೆಯನ್ನು ಮಾಡಬೇಡ-do not kill any living being

**अन्तरङ्गशुद्धिः** : ಅಂತರಂಗ ಶುದ್ಧಿ-internal purification

**बहिरङ्गशुद्धिः** : ಬಹಿರಂಗಶುದ್ಧಿ-external purification

| | | |
|---|---|---|
| **दया** | : | ದಯೆ-mercy, kindness |
| **त्रिकरणशुद्धः** | : | ಕಾಯಾ-ವಾಚಾ-ಮನಸಾ ಶುದ್ಧವಾಗಿರುವುದು-to be pure in thoughts, words and action |
| **मुक्तः** | : | ಮುಕ್ತಿಯನ್ನು ಪಡೆದವನು-one who has attained salvation |
| **रसालः** | : | ಮಾವು-mango |
| **आमलकम्** | : | ನೆಲ್ಲಿಕಾಯಿ-gooseberry |
| **भानुं विना** | : | ಸೂರ್ಯನಿಲ್ಲದೆ-without the Sun-**विना**-ಎಂಬ ಅವ್ಯಯವನ್ನು ಉಪಯೋಗಿಸಿದಾಗ ಅದರೊಡನೆ ಬಳಸಲ್ಪಡುವ ನಾಮಪದ ಅಥವಾ ಸರ್ವನಾಮಪದವು ದ್ವಿತೀಯಾ, ತೃತೀಯಾ ಅಥವಾ ಪಂಚಮಿವಿಭಕ್ತಿಯಲ್ಲೇ ಇರಬೇಕು-when the indeclinable **विना** is used with noun or a pronoun, that noun or pronoun should be in **द्वितीया विभक्तिः** (accusative case), **तृतीया विभक्तिः।** |

## अभ्यासः

**I द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. अन्तरङ्गशुद्धि-बहिरङ्गशुद्ध्योः विषये बसवण्णस्य अभिप्रायः।
2. कूडलसङ्गम प्रसादनस्य पद्धतिः का?
3. अक्कमहादेवी ज्ञान-भक्त्योः अविनाभावसम्बन्धं कथं वर्णयति ?

**II मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. मा चोरय मा............मा कथयासत्यम् ।
2. ...........अपेक्ष्यते सकलेष्वपि प्राणिषु ।
3. अन्नदाने.....अस्ति ।

4. कुत्रत्यो रसालः ? कुत्रत्यः …………।

| दयैव, पुण्यम्, कोकिलः, मारय |
|---|

**III रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।**

1. सकलेष्वपि प्राणिषु दया अपेक्ष्यते ।
2. धनप्रदाने तु श्रीः भवति ।
3. किरणान् विना भानुः नास्ति ।

**IV संयोजयत**

| अ | आ |
|---|---|
| बसवण्णः | गुहेश्वरलिङ्गः |
| अल्लमप्रभुः | चेन्नमल्लिकार्जुनः |
| अक्कमहादेवी | कूडलसङ्गमदेवः |
| आचारः | धर्मस्य मूलम् |
| दया | स्वर्गः |

## — योग्यताविस्तारः —

पाठे यानि वचनानि प्रदत्तानि तेषां कन्नडभाषायां वचनानि अवगमनार्थमत्र दत्तानि ।

1. ಕಳಬೇಡ ಕೊಲಬೇಡ ಹುಸಿಯ ನುಡಿಯಲು ಬೇಡ
ಮುನಿಯಬೇಡ, ಅನ್ಯರಿಗೆ ಅಸಹ್ಯ ಪಡಬೇಡ
ತನ್ನ ಬಣ್ಣಿಸಬೇಡ ಇದಿರ ಹಳಿಯಲು ಬೇಡ
ಇದೇ ಅಂತರಂಗ ಶುದ್ಧಿ ಇದೇ ಬಹಿರಂಗ ಶುದ್ಧಿ
ಇದೇ ನಮ್ಮ ಕೂಡಲಸಂಗಮನೊಲಿಸುವ ಪರಿ ॥ (235) – (ಬಸವಣ್ಣ)

2. ದಯವಿಲ್ಲದ ಧರ್ಮವಾವುದಯ್ಯ
ದಯವೇ ಬೇಕು ಸಕಲ ಪ್ರಾಣಿಗಳೆಲ್ಲರಲ್ಲಿ
ದಯವೇ ಧರ್ಮದ ಮೂಲವಯ್ಯ
ಕೂಡಲಸಂಗಯ್ಯನಂತಲ್ಲದೊಲ್ಲನಯ್ಯ ॥ (247) – (ಬಸವಣ್ಣ)

3. ಅನ್ನವನಿಕ್ಕಿದರೆ ಪುಣ್ಯವಹುದು,
ವಸ್ತ್ರವ ಕೊಟ್ಟರೆ ಧರ್ಮವಹುದು,
ಹಣವ ಕೊಟ್ಟರೆ ಶ್ರೀಯಹುದು
ತ್ರಿಕರಣ ಶುದ್ಧವಾಗಿ ನೆನೆದರೆ ಮುಕ್ತಿಯಹುದು,
ಕೂಡಲಚೆನ್ನ ಸಂಗಯ್ಯನಲ್ಲಿ ॥ – (676) (ಚೆನ್ನಬಸವಣ್ಣ)

4. ಎತ್ತಣ ಮಾಮರ ಎತ್ತಣ ಕೋಗಿಲೆ
ಎತ್ತಣಿಂದೆತ್ತ ಸಂಬಂಧವಯ್ಯ ।
ಬೆಟ್ಟದ ನೆಲ್ಲಿಕಾಯಿ ಸಮುದ್ರದ ಉಪ್ಪು
ಎತ್ತಣಿಂದೆತ್ತ ಸಂಬಂಧವಯ್ಯ ।
ಗುಹೇಶ್ವರ ಲಿಂಗಕ್ಕೆಯು ಎನಗೇಯು
ಎತ್ತಣಿಂದೆತ್ತ ಸಂಬಂಧವಯ್ಯ । (473) – (ಅಲ್ಲಮಪ್ರಭು)

5. ಜ್ಞಾನವು ಸೂರ್ಯನಂತೆ
ಭಕ್ತಿಯು ಸೂರ್ಯಕಿರಣಗಳಂತೆ
ಸೂರ್ಯನಿಲ್ಲದೆ ಕಿರಣಗಳಿಲ್ಲ
ಕಿರಣಗಳಿಲ್ಲದೆ ಸೂರ್ಯನಿಲ್ಲ
ಜ್ಞಾನವಿರದ ಭಕ್ತಿ , ಭಕ್ತಿಯಿರದ ಜ್ಞಾನವಿರಲೆಂತು
ಚೆನ್ನಮಲ್ಲಿಕಾರ್ಜುನ ॥ (1210) – (ಅಕ್ಕಮಹಾದೇವಿ)

1. अन्यैः रचितानि वचनानि गायत ।

2. बसवण्णः, अल्लमप्रभुः, अक्कमहादेवी प्रभृतीनां वचनकर्तॄणां जीवनचरितं पठत ।

### अनुशंसितग्रन्थाः


1. वचनम्-सम्पादनम्-कन्नडभाषाया-डा. कलबुर्गी, संस्कृतेन-डा.एच्. वि. नागराजराव्-बसवसमितिः-२०१२
2. वचनम्-संस्कृतानुवादः-एस्. जगन्नाथः-सम्पादनम्-प्रो. नागेश् के.एस्.-प्रकाशनम्-लक्ष्मी मुद्रणालयः, दावणगेरे-२००४


* * *

Revised Edition 2017

# १२. कन्नडकण्वः

(व्यक्तिपरिचयः)

## पीठिका

कर्णाटकस्य भूमिः पावनी । राज्यमेतद् श्रीगन्धस्य उत्पत्तिस्थानं स्वर्णभूमिः, सुसंस्कृतजनेष्वग्रेसरम् इति विश्वमान्यं वर्तते । एतस्याः कीर्तेः पालनं, भूमिः-भाषा-जलादीनां रक्षणं प्रत्येकस्यापि कर्नाटकनिवासिनः आद्यः कर्तव्य एव । स्वातन्त्र्यात् पूर्वतनकाले सर्वत्र आङ्ग्लानाम् अधिकारः आसीत् । मातृभाषया सम्भाषणम् अगौरवमिति परिगणितं जनैः । तस्मिन् सङ्कटे काले श्री बि.एम्. श्रीकण्ठय्यमहोदयः जन्म लेभे । कन्नडमातुः सेवाकर्तृषु अग्रणीः । अस्य कन्नडभाषा प्रेम, पाण्डित्यं, जीवनपद्धतिः, कन्नडभाषानिष्ठादयः भारतस्य भाविनिर्मातॄणां विद्यार्थिनाम् आदर्शो भवितुमर्हति इत्याशास्य तस्य जीवनस्य संक्षिप्त परिचयः प्रदत्तमस्ति ।

**श्रीमान् 'बि.एम्.श्रीकण्ठय्यमहोदयः' 'श्री' इति नाम्नैव सुप्रसिद्धः । सः क्रिस्ताब्दस्य १८८४ तमवर्षस्य जनवरिमासस्य तृतीये दिवसे जन्म लेभे । श्रीमति भागीरथम्म-मैलारय्यदम्पत्योः सुपुत्र एषः । मण्ड्यमण्डलस्य नागमङ्गलोपमण्डलस्य बेल्लूरु अस्य पूर्वजानां वासस्थानम्।**

**अस्य पिता मैलारय्यमहोदयः न्यायवादी आसीत् । 'श्री' महोदयस्य बाल्यं श्रीरङ्गपत्तने व्यतीतम् ।**

**प्रौढशालाशिक्षणानन्तरं मैसूरुमहाराजकालेज् मध्ये FA शिक्षणं समाप्य, बेङ्गलूरु सेन्ट्रलकालेजतः BA पदवीमलभत । मद्रास् नगरे LLB, LLM च पदव्यौ च प्राप्य मैसूरुनगरं प्रतिनिवृत्तः।**

**यदा सः मद्रास्नगरे आसीत् तदा साहित्यस्य प्रौढं चिन्तनम् अकोरत् । कन्नडभाषाया अभ्युदयमेव सदा चिन्तयति स्म । 'आङ्गलभाषायां स्थितार्थसम्पत् कन्नडं प्रति कथमागच्छति? कन्नडसाहित्यस्य कृषेः रीतिः का ? आङ्ग्लभाषासम्पर्केण संवर्धनं कथम् ? इत्येव सः सर्वदा अचिन्तयत् ।**

**'श्री' प्रथमं भौतशास्त्रम् अधीतवान्, अध्ययनं तु आङ्गलभाषायाम् । तथापि तस्य कन्नडभाषाप्रेम न कुण्ठितम् अभवत् । एषः न केवलं कन्नडभाषासेवायां निरत आसीत्, तस्याः**

पोषणे वर्धने च अविरतं परिश्रमं कृतवान् । आङ्ग्लसाहित्ये विद्यमानेन तद्वैदुष्येन आङ्ग्लपण्डिता एव चकिता अभवन् । प्रो. मेकेन्टिष् इति आङ्ग्लभाषासूरिः एवम् उद्गिरति- 'श्री तस्य गतजन्मनि आक्स्फर्ड् विश्वविद्यालयस्य आङ्ग्लभाषाप्राध्यापक एव स्यात्'-इति । एवमासीत् तज्ज्ञानं तलस्पर्शि ।

१५.०१.१९०९ तमे वर्षे स्ववृत्तिजीवनम् आङ्ग्लभाषाध्यापकत्वेन प्रारभत । वृत्तेः पावित्र्यं रक्षतानेन आजीवनं विद्यार्थित्वम् आलिङ्गितम्, इत्युक्ते निरन्तरम् अभ्यासे निरत आसीत् ।

कन्नडभाषायाः प्रसिद्धाः कवयः लेखकाश्च अस्य शिष्याः आसन् । श्री महोदयस्य शिष्यवात्सल्यमनुपमम्। प्रतिभान्वितान् शिष्यान् श्लाघया प्रोत्साहयति स्म । कन्नडस्य प्रसिद्धः लेखकः प्रो. ए.एन्. मूर्तिराव्महोदयः 'श्री' शिष्येष्वन्यतमः । यदा सः तस्य विद्यार्थी अभवत् आङ्ग्लभाषायां प्रबन्धं विरच्य गुरवे दर्शितवान् । प्रबन्धं दृष्ट्वा श्री एव चकितोऽभवत् । कक्ष्यायां प्रबन्धवाचनं कृत्वा 'एतस्मादपि उत्तमा रचना मयाप्यसाध्या' इति तं शिष्यं मनसा प्राशंसत् ।

'राष्ट्रकविः' इति ख्यातनामा ज्ञानपीठप्रशस्तिपुरस्कृतः 'कुवेम्पु' अपि श्री महोदयानां शिष्यः । क्रि.श. १९२८ तमे वर्षे कलबुर्गीकन्नडसाहित्यसम्मेलने अध्यक्षपदम् ऊढं श्री महोदयैः। तस्मिन् सन्दर्भे तेषां 'गदायुद्ध'-नाटकम् अभिनीतम्, तथैव कुवेम्पु महोदयानां 'यमनसोलु'-नाटकमपि । आयोजकैः वेदिकायां पुष्पमालिकां समर्पयितुम् आगतम्, 'श्री' स्वयमेव कुवेम्पुमहोदयं वेदिकामाहूय तत्पुष्पमालां तस्य कण्ठे धारयित्वा आनन्दितोऽभवत् । एवं शिष्याणां प्रतिभा प्रोत्साहिता अनेन । पद्धतिरेषा सर्वैरपि अनुकरणीया भवति ।

श्री सहप्राध्यापकः, प्राध्यापकस्य च पदमारूढः मैसूरुविश्वविद्यानिलयस्य कुलसचिवः अप्यभूत् । मैसूरुविश्वविद्यानिलये कन्नडस्नातकोत्तराध्ययनम् आरब्धवान् ।

कन्नडसेवार्थं युवानः क्रियाशीलाः भवेयुः इति तस्य महती आशा आसीत् । विद्यार्थिनां कृते 'अध्ययनगोष्ठीः' आयोजिता अनेन । कन्नडवाङ्मयस्य विविधप्रकारान् जनसामान्याः अवगच्छेयुः इति अपेक्षा आसीत् । अतः कथाः, कवनप्रकाराः, नाटकानि, विमर्शाग्रन्थाः इत्यादीनां सौलभ्यं जनसामान्यः लभेत इति 'मैसूरु-विश्वविद्यानिलय-ग्रन्थमाला' अस्य सम्पादकत्वे स्थापिता । आधुनिकज्ञानविज्ञानसम्बद्धमपि साहित्यं विरचय्य आनुकूल्यं कल्पितवान् ।

'इङ्ग्लिष् गीतेगळु' इति तस्य कवनसङ्कलनम् आङ्ग्लभाषा प्रसिद्धकवीनां षेक्स्पियर इत्यादीनां कवितानां कन्नडानुवादरूपः । 'होङ्गनसु' तस्य स्वतन्त्रा विरचना । 'गदायुद्धनाटकम्' कन्नडनाटकप्रपञ्चे रुद्रनाटकेषु प्रमुखम् । 'अश्वात्थामन्', 'पारसिक' इत्यन्यं रुद्रनाटकं कन्नडे अनूद्य कन्नडभाषायाम् अपि ऐतिहासिकं रुद्रनाटकमयोजयत् । कि.श. १९४२ तमे वर्षे स्ववृत्या निवृत्तोऽभवत्, प्रवृत्या न ।

भारतरत्नं विश्वेश्वरय्यमहोदयस्य दूरदृष्टेः फलेन साक्षात्कृता क्रि.श. १९१५ तमे वर्षे 'कन्नडसाहित्यपरिषत्' आरब्धा । साहित्यपरिषदः आध्यक्ष्ये सेवा कृता । कन्नडभाषायाः साहित्यस्य च रक्षणार्थं संवर्धनार्थं च श्री कन्नडसेवायै कटिबद्धो भूत्वा जीवनपर्यन्तमपि अस्मिन्नेव कार्ये निरत आसीत् ।

विषयोऽन्यः अत्र प्रस्तोतव्य एव । आधुनिककर्नाटकप्रान्तः स्वातन्त्र्यात् पूर्वम् आङ्ग्लानां शासनावधौ, तेषाम् आनुकूल्यार्थं विविधप्रान्तेषु विभजित आसीत् । ब्रिटिष्जनैः आङ्ग्लभाषा शासनभाषात्वेन उपयुक्ता । सर्वत्र आङ्ग्लभाषैव नित्योपयोगिनी कृता । शकुन्तैः पक्षिभिः पोषिताम् अरण्ये मातापितृभ्यां विहीनां शकुन्तलां कण्वमहर्षिः स्वाश्रमं नीत्वा यथा तां वर्धितवान् तथैव अनेनापि हीनदशायां स्थितां कन्नडभाषाम् अपोषयत्, अवर्धयत्, तत्स्थानं पुनरस्थापयत् इति कारणतः ज्ञानपीठप्रशस्तिपुरस्कृतैः श्री मास्तिवेमटेश अय्यङ्गार्यमहोदयैः एषः 'कन्नडकण्वः' इति प्राशंस्यत । तदानीन्तनमैसूरुराजैः 'राजसेवासक्तः' इत्युपाधिना सत्कृतः। वयमपि श्री जीवनमार्गमनुसृत्य कन्नडभाषाप्रेम मनसि निक्षिप्य, सर्वत्र वर्धयित्वा, कर्नाटक राज्ये 'सिरिगन्नडं गेल्गे' इति तेषाम् उक्तिं साधयेम, जीवने सार्थकतां च लभेमहि ।

## शब्दार्थः टिप्पणी

| | | |
|---|---|---|
| अभ्युदयः | : | ಪ್ರಗತಿ, ಏಳಿಗೆ-elevation, |
| भौतशास्त्रम् | : | ಭೌತಶಾಸ್ತ್ರ-Physics |
| वैदुष्यम् | : | ಪಾಂಡಿತ್ಯ-Wisdom |
| तज्ज्ञानम् | : | **तत् + ज्ञानम् - तद् + ज्ञानम् - श्चुत्वसन्धिः** |
| तलस्पर्शि ज्ञानम् | : | ಆಳವಾದ ಜ್ಞಾನ-knowledge in depth |

श्लाघा : **प्रशंसा**-ಹೊಗಳಿಕೆ-praise

युवानः : **न् कारान्तपुंलिङ्गस्य 'युवन्' शब्दस्य प्रथमाविभक्तेः बहुवचनरूपम्।**

अवगच्छेयुः : ತಿಳಿಯಬೇಕು-should know

कटिबद्धः : ಸಿದ್ಧರಾಗಿ-to be ready

प्रस्तोतव्यः : **प्र-उपसर्गपूर्वक स्तुधातोः विध्यर्थककृदन्तस्य पुंलिङ्गे प्रथमाविभक्तेः एकवचनरूपम् ।**

## अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. 'श्री' महोदयः कदा जन्म लेभे ?
2. 'श्री' महोदयस्य माता का ?
3. 'श्री' महोदयस्य शिष्येषु एकस्य नाम लिखत ।
4. मैसूरुमहाराजः तं केन उपाधिना सममानयत् ?
5. श्री महोदयं 'कन्नडकण्वः' इति नाम केन सूचितम् ?

**II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. 'श्री' महोदयस्य बाल्यम् ।
2. 'श्री' महोदयस्य शिष्यवात्सल्यम् ।
3. 'श्री' महोदयस्य कृतयः ।

**III दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. 'श्री' महोदयस्य कन्नडसेवा ।
2. 'श्री' महोदयस्य आदशमयं जीवनम् ।

## IV रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।

1. 'श्री' महोदयस्य बाल्यं श्रीरङ्गपत्तने व्यतीतम् ।
2. विद्यार्थिनां कृते 'अध्ययनगोष्ठी:' आयोजिता अनेन ।
3. कर्नाटक राज्ये 'सिरिगन्नडं गेल्गे' इति तेषाम् उक्तिं साधयेम।

## — योग्यताविस्तारः —

१. 'श्री' महोदयस्य जीवनचरितं पठत ।

२. तस्य कृतीनाम् अध्ययनं कुरुत ।

३. कक्ष्यायां तस्य गीतानि गायत ।

४. FA - First year Arts  BA - Bachelor of Arts

LLB - Bachelor of Law  LLM - Master of Law

५. तस्य नाटकानि अभिनयत ।

## अनुशंसितग्रन्थाः


1. **ಕನ್ನಡ ಕಣ್ವ ಬಿ.ಎಂ.ಶ್ರೀ.** - ಬಿ.ಎಂ.ಶ್ರೀ ಪ್ರತಿಷ್ಠಾನ, ಬೆಂಗಳೂರು.
2. BMS : The man and his mission BMS memorial foundation.
3. ಶ್ರೀ ಸಾಹಿತ್ಯ-ಕನ್ನಡ ಅಧ್ಯಯನ ಸಂಸ್ಥೆ, ಪ್ರಸಾರಾಂಗ, ಮಾನಸಗಂಗೋತ್ರಿ, ಮೈಸೂರು ವಿಶ್ವವಿದ್ಯಾನಿಲಯ.


***

# १३. विज्ञानपथः

(भारतीय विज्ञानविकासः)

## पीठिका

'ज्ञानं विज्ञानसहितम्', 'लोके धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः' इत्यादय उक्तयः विज्ञानस्य महत्त्वं प्रकटयन्ति । वैज्ञानिकयुगोऽयम्, तन्त्रज्ञानमत्यन्तमभिवृद्धमिति सम्यग्जानीमो वयम् । किन्तु जनानां मनांसि धारणा एषा कोऽपि भ्रमः वरीवर्ति यत् 'पाश्चात्यदेशैस्तुलिते यावती अभिवृद्धिः, प्रगतिः क्षेत्रेऽस्मिन् वर्तते तावतीमस्माकंदेशे द्रष्टुं न शक्यत' इति सत्यतामस्याः परिशीलयामस्तावदिदानीम् ।

द्वादशशतमानपर्यन्तं विज्ञानप्रगतिरेषा अबाधिता अकुण्ठिता चासीत् । वैदेशिकानामाक्रमणैः, प्राकृतिकविकोपैः, वैयक्तिककारणैश्च नैके ग्रन्थाः, शृङ्खलाबन्धाश्चाद्य नष्टाः । इदानीमस्माभिः न लभ्यत इति कारणात् भारतदेशे केवलमाध्यात्मिकविचारस्य चिन्तनमभूत्; न विज्ञानस्येति कथं वक्तुं शक्नुमः ? प्राचीनभारते विज्ञानविषये प्रगतिः कथमासीदिति चिन्तयामस्तावदिदानीम् ।

**वेदकालादेव भारते संस्कृतेः विकासं पश्यामः । तस्या समान्तरतयैव विज्ञानमपि अभिवृद्धमभूत् । विज्ञानस्य नैकासु शाखासु अस्माकं पूर्वजाः चिन्तनशीलाः पण्डिताश्च आसन् । काले तस्मिन् अनेके ग्रन्था अपि व्यरचि । खगोलशास्त्रे, गणितशास्त्रे, जीवशास्त्रे, परिसरविज्ञाने तेषां महत्तमसाधनानि ज्ञातुं प्रयतामहे।**

### खगोलशास्त्रम् गणितशास्त्रम् च

**खगोलशास्त्रे गणितशास्त्रे च वैचारिकमौन्नत्यं दृश्यते । वेदेष्वेव सौरमण्डले स्थितानां दशग्रहाणाम् उल्लेखं पश्यामः । गुरुग्रहस्य रक्तवर्णचिह्नोल्लेखनम् (Red Spot) अत्यन्तं विस्मयावहं यच्चिह्नमाधुनिकालेख्ये (Modern Photograph) द्रष्टुं शक्यं यत् बृहद्दूरदर्शकयन्त्रात् (Telescope) स्वीकृतं भवति । मङ्गलग्रहात् उपग्रहद्वयस्य भूमेश्च चन्द्रस्य वियोजनं, सूर्यं परितः ग्रहाणां परिभ्रमणं, भूमेः गुरुत्वाकर्षणशक्तिः इत्यादयो विचाराः ऋग्वेदकाले यदुक्तं तदाधुनिकविज्ञानप्रतिपादितमिति भ्रान्त्या विज्ञानिभिः परिगण्यते । ग्रहाः भ्रमणशीलभ्रमरकमिव (Like a Spinning Top) परिभ्रमन्ति इत्यस्माकं प्राचीनमहर्षयः सम्यग्ज्ञातवन्तः । ग्रहाः स्वाक्षे परिभ्रमन्तीति तैर्ज्ञातमासीत् । सूर्य एव पृथिव्याधारः इति तैर्विदितम् । दिन-रात्रि-मास-**

ऋतु-अयन-संवत्सराणामुल्लेखोऽत्र द्रष्टुं शक्यते । चन्द्रस्य वृद्धिह्रासस्य च तत्प्रकाशस्य च मूलं सूर्य एवेति यथोपचितलब्धिरासीत्तेषाम् ।

अद्य आप्रपञ्चम् उपयुज्यमानाः सङ्ख्याः **(Numbers)** दशमानपद्धतिश्च **(Base ten system)** भारतीययोगदानमिति अभिमानार्होऽयं विषयः । पदानां द्वारा सङ्ख्यानां व्यञ्जनमपि तेषामन्यं वैशिष्ट्यम् । विविधानां यज्ञानां **(Sacrifices)** कृते विविधयज्ञकुण्डानां **(Sacrificial Altars)** निर्मितिः आवश्यकी । तदर्थं तैः विविधरेखागणिताकृतयः **(Geometrical Figures)**, तासां क्षेत्रफलम् **(Area)**, रूपान्तरम् **(Transformation)** इत्यादय वेदितव्य एवासीत् । अतः क्षेत्रमिदं तत्काल एव प्रवृद्धम् । बीजगणिते **(Algebra)** समीकरणानाम् **(Equations)** विश्लेषणे, विशेषतया एककालिक-समीकरणानि **(Simultaneous Equations)**, अनेकाव्यक्तयुक्तानां समीकरणानां विश्लेषणे **(Simultaneous Equations with many variables)** भारतीयाः अग्रेसरा आसन् । बीजगणिते रेखागणितस्योपयोगः, रेखागणितस्य बीजगणितद्वारा अभिव्यञ्जनं तेषामुत्कृष्टज्ञानस्य स्पष्टं निदर्शनम्। आर्यभट-ब्रह्मगुप्त-महावीर-श्रीधर-भास्कराचार्यादिभिः क्षेत्रमिदं फलवत्ततां प्राप । एषु द्वितीयः भास्कराचार्यः विशिष्यते। तस्य वैशिष्ट्यमिदमस्ति यत् सः प्रकृतिरमणीयानि दृश्यानि वर्णयन् समस्यां प्रस्तौति । आधुनिक कालीन सुप्रसिद्धः गणितज्ञः श्रीनिवास रामानुजन् पर्यन्तं क्षेत्रमिदं विस्तृतम् । सर्वेषां योगदानैः विस्तारतां गभीरतां चाप ।

### जीवशास्त्रम् परिसरविज्ञानम् च

जीवशास्त्रेऽपि पूर्वजानां साधना अपूर्वा । सस्यानां प्राणिनां च वर्गीकरणं तेषां गुणमवलम्ब्य कृतं तैः। 'अश्वशास्त्रम्', 'गजशास्त्रम्' चोद्दिश्य स्वतन्त्रतया ग्रन्था विरचिताः । सर्पाणामध्ययने दल्वनो विशेषज्ञ इति ज्ञायते । सः त्रयोदशविधसर्पाणाम् अध्येता इति उल्लेखो दृश्यते ।

परिसररक्षणम् आद्यं कर्तव्यं मन्यन्ते स्म ते । सूर्यः देवः, वृक्षोऽपि देवः, जलमपि देवः, वायुर्देवः, भूमिः देवता, एवं सर्वत्र दैवमपश्यन् ते । एषां प्रदूषणं नाशो वा पापमिति ते पर्यगणयन् । सस्यानां रक्षणं, प्राणिनां रक्षणं, तेषामुपयुक्तता, एतत्सर्वं सम्यग्ज्ञात्वैव व्यवहारमकुर्वन् । अत एव तैरुक्तं 'पञ्चाम्ररोपी नरकं न याति' इति । वापीकूपतटाकानां निर्माणे महत्त्वं दत्तवन्तस्ते । केवलं निर्माणे न, तेषां रक्षणेऽपि बद्धादराः । एषु स्थलेषु ये मालिन्यं

कुर्वन्ति तेषां कृते शिक्षा दण्डश्च विहितं तैः । तदर्थं शासनान्यपि व्यरचि । अन्तर्जलसमतलं रक्षितमेवम् ।

आर्यभटविरचितम् 'आर्यभटीयम्', वराहमिहिरस्य 'पञ्चसिद्धान्तिका', 'बृहत्संहिता', रसशास्त्रसम्बद्धं नागार्जुनेन विरचितं 'कक्षापुटतन्त्रम्' आयुर्वेदग्रन्थाः चरकसुश्रुतानां संहिते भास्कराचार्यस्य 'सिद्धान्तशिरोमणिः' इत्यादयो ग्रन्थाः विज्ञानस्य नैकासु शाखासु प्राचीने काले भारतीयाः पण्डितप्रवरा विचक्षणाः च आसन्निति प्रतिपादयन्ति । एतेषां ग्रन्थानामध्ययने वयं सर्वे बद्धादरा भवेम ।

## शब्दार्थः टिप्पणी

| | | |
|---|---|---|
| अभ्युदयः | : | ಪ್ರಗತಿ, ಅಭಿವೃದ್ಧಿ-development, |
| भौतशास्त्रम् | : | ಭೌತಶಾಸ್ತ್ರ-Physics |
| खगोलशास्त्रम् | : | ಖಗೋಲಶಾಸ್ತ್ರ-Astronomy |
| गणितशास्त्रम् | : | ಗಣಿತಶಾಸ್ತ್ರ-Mathematics |
| जीवशास्त्रम् | : | ಜೀವಶಾಸ್ತ್ರ-Biology |
| परिसरविज्ञानम् | : | ಪರಿಸರವಿಜ್ಞಾನ-Environmental Science |
| महत्तमसाधनानि | : | ಶ್ರೇಷ್ಠ ಸಾಧನೆಗಳು-Great achievements |
| सौरमण्डलम् | : | ಸೌರಮಂಡಲ-Solar system |
| रक्तवर्णचिह्नोल्लेखनम् | : | ಕೆಂಪು ಬಣ್ಣದ ಚಿಹ್ನೆ-Red Spot |
| यच्चिह्नमाधुनिकालेख्ये | : | ಆಧುನಿಕ ಭಾವಚಿತ್ರ-Modern Photograph |
| बृहद्दूरदर्शकयन्त्रात् | : | ದೂರದರ್ಶಕ-Telescope |
| गुरुत्वाकर्षणशक्तिः | : | ಗುರುತ್ವಾಕರ್ಷಣ ಶಕ್ತಿ-Gravitational force |
| भ्रमणशीलभ्रमरकमिव | : | ತಿರುಗುತ್ತಿರುವ ಬುಗುರಿಯಂತೆ-Like a Spinning Top |

| | | |
|---|---|---|
| स्वाक्षे | : | ತನ್ನ ಅಕ್ಷದಲ್ಲಿ-on its own axis |
| पृथिव्याधारः | : | ಭೂಮಿಗೆ ಆಧಾರ-source of earth |
| वृद्धिह्रासस्य | : | ವೃದ್ಧಿಕ್ಷಯ-phases of moon |
| दशमानपद्धतिश्च | : | ದಶಮಾನ ಪದ್ದತಿ-Base ten system |
| भारतीययोगदानम् | : | ಭಾರತೀಯರ ಕೊಡುಗೆ-Indian contribution |
| यज्ञम् | : | ಯಜ್ಞ-Sacrifice |
| यज्ञकुण्डम् | : | ಯಜ್ಞವೇದಿಗಳು-Sacrificial Altars |
| विविधरेखागणिताकृतय | : | ನಾನಾ ರೀತಿಯ ರೇಖಾಗಣಿತದ ಆಕೃತಿಗಳು-different Geometrical Figures |
| क्षेत्रफलम् | : | ಕ್ಷೇತ್ರಫಲ-Area |
| रूपान्तरम् | : | ರೂಪಾಂತರ-Transformation |
| बीजगणिते | : | ಬೀಜಗಣಿತ-Algebra |
| समीकरणम् | : | ಸಮೀಕರಣ-Equations |
| एककालिक-समीकरणानि | : | ಏಕಕಾಲಿಕ ಸಮೀಕರಣಗಳು-Simultaneous Equations |
| अनेकाव्यक्तयुक्तानां समीकरणानि | : | ಅನೇಕಾವ್ಯಕ್ತಗಳುಳ್ಳ ಏಕಕಾಲಿಕ ಸಮೀಕರಣಗಳು-Simultaneous Equations with many variables |
| विश्लेषणम् | : | ವಿಶ್ಲೇಷಣೆ- analysis |
| वर्गीकरणं | : | ವರ್ಗೀಕರಣ-classification |
| अश्वशास्त्रम् | : | ಅಶ್ವಶಾಸ್ತ್ರ-Horse minding |

**गजशास्त्रम्** : ಗಜಶಾಸ್ತ್ರ-Elephant minding

**परिसररक्षणम्** : ಪರಿಸರ ರಕ್ಷಣೆ-protection of environment

**मालिन्यम्** : ಮಾಲಿನ್ಯ-pollution

**शिक्षा दण्डश्च** : ಶಿಕ್ಷೆ ಮತ್ತು ದಂಡ-punishment and penalty

**शासनम्** : ಶಾಸನಗಳು-Inscriptions

**अन्तर्जलसमतलम्** : ಅಂತರ್ಜಲದ ಮಟ್ಟ-ground water level

## अभ्यासः

**I दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. भारतदेशे विज्ञानस्य प्रगतिम् अधिकृत्य लघु प्रबन्धं लिखत ।
2. भारते गणितशास्त्रं खगोलशास्त्रं च कथम् उन्नतिं नीते इति विशदयत ।
3. जीवविज्ञानं परिसरविज्ञानं च अधिकृत्य लघुटिप्पण्यौ रचयत ।

**II मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. वेदेष्वेव सौरमण्डले स्थितानां..........ग्रहाणाम् उल्लेखं पश्यामः ।
2. अद्य आप्रपञ्चम् उपयुज्यमानाः सङ्ख्याः..........च भारतीययोगदानम् ।
3. अश्वशास्त्रम्..........चोद्दिश्य स्वतन्त्रतया ग्रन्था विरचिताः ।

| दशमानपद्धतिः, गजशास्त्रं, दश |
|---|

**III रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।**

1. <u>सर्पाणामध्ययने</u> दल्वनो विशेषज्ञः ।
2. सस्यानां प्राणिनां च वर्गीकरणं <u>गुणमवलम्ब्य</u> कृतम् ।

## IV संयोजयत

| अ | आ |
|---|---|
| भूमिः | कक्षापुटतन्त्रम् |
| आर्यभटः | लीलावती |
| चरकसंहिता | गुरुत्वाकर्षणम् |
| नागार्जुनः | आयुर्वेदग्रन्थः |
| भास्कराचार्यः | आर्यभटीयम् |

## — योग्यताविस्तारः —

१. वेदेषु विद्यमानवैज्ञानिकांशान् अवगन्तुं प्रयत्नं कुर्वन्तु । उदा-ऋग्वेदमन्त्रेषु सूर्यः पृथ्वियाधारः सूर्यरश्मिश्चन्द्रमास्तिरति गन्धर्वः इत्यादयः ।

२. प्राचीनभारते विज्ञानस्य विकासमवगन्तुं संस्कृतभारत्याः Pride Of India, Science In Sanskrit ಹೆಮ್ಮೆಯ ಭಾರತ इत्यादीन् ग्रन्थानवलोकयन्तु ।

३. भास्कराचार्यस्य लीलावतीग्रन्थे स्थितानां समस्यानां विश्लेषणे प्रयत्नं कुर्वन्तु ।

४. Tenth planet in the Solar System - Eris dwarf discovered in 2005 AD.

## अनुशंसितग्रन्थाः


1. **ऋग्वेदसंहिता-** Mysore Palace Edition

2. A Concise History of Science in Ancient India - By D.M.Bose, B.V.Subbarayappa and S.N.Sen-Indian National Science Academy - New Delhi - 1971.

3. Aryabhateeya of Aryabhata- Critically Edited with Notes and Tr. by K.V.Sharma and K.S.Shukla - Indian National Science Academy- New Delhi-1976.

4. The Cosmic Yajna- The story of creation from Vedas - M.L. Guptha - Published by Samhita books -1999

5. Dawn Of Indian Science - Part I and II - O.P.Jaggi - Atmarama and Sons - Delhi.

6. Indian Astronomy - A source book - by B.V.Subbarayappa and K.V.Sharma- Nehru Centre - Bombay - 1985

7. The founders of Science in Ancient India - Part I and II

8. संस्कृते विज्ञानम् - संस्कृतभारती

9. S. Balachandra Rao, Indian Mathematics and Astronomy–Some Landmarks, Bhavan's Gandhi centre of Science and Human Values. B'lore – 01. -2004 (Rev. edn.)

10. S. Balachandra Rao, Indian Astronomy, An Introduction, Universities Press (India) Ltd., Hyderabad- 2000.

11. ವಿಜ್ಞಾನ ಮತ್ತು ತಂತ್ರಜ್ಞಾನ-ಡಾ. ಎಂ.ಕೆ. ಶ್ರೀಧರ್-ಭಾರತೀಯ ವಿದ್ಯಾಭವನದ ಗಾಂಧಿ ಕೇಂದ್ರ-2002

12. The Positive Sciences of the Ancient Hindus- Brajendranath Seal- Motilal Banarasidass, New Delhi - 1985.

* * *

# व्याकरणादिविभागः

# संस्कृतवर्णमाला

विश्वस्मिन् विद्यमानासु सहस्राधिकभाषासु संस्कृतभाषा एव सर्वप्राचीना । संपद्भरिता, नित्योपयुक्ता, भारतीयभाषाणां सर्वासां मातृभाषावत् सुशोभते । तथा अधिकवैज्ञानिकी च । अतः एवेयं अमरवाणी, देववाणी, सुरभारती, गीर्वाणवाणी इत्यादिभिः नानानामभिः संसूच्यते । 'भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती' इति प्राज्ञोक्तिः वरीवर्ति ।

भाष्यते इति भाषा । मानवाः सर्वप्राणिषु श्रेष्ठाः इति सर्वैः विदितमेव । भाषा एव तत्र कारणम् । मानवः स्वीयमभिप्रायम् अन्येभ्यः स्पष्टतया प्रापयति । भावाभिव्यक्तौ भाषायाः सामर्थ्यं वर्तते । अतः भावाभिव्यञ्जनायाः मूलम् इयं भाषा शब्दात्मिका । अत एवोक्तम् 'वाण्येका समलङ्करोति पुरुषम्' इति । 'देववाणी' इत्यत्र देवशब्दः निर्दिष्टतायाः गौरवार्हतायाः प्राचीनतायाः सकलगुणपरिपूर्णतायाश्च व्यञ्जको भवति । अत्र पाणिनिना व्याकरणशास्त्रेण कृतः परिष्कारः निदानम् ।अत एव संस्कृतभाषायां नित्यनूतनता निरन्तरतया व्यवहार्यता च दृश्यते ।

भाषा सर्वदा वाक्यात्मकं भवति । पूर्णार्थबोधकपदसमूहः वाक्यम् इति उच्यते । पदं अर्थवाचकवर्णसमूहः । मुखे विभिन्नस्थानैः उच्चरितध्वनिः एव वर्णः इति । वर्णस्य अपरं नाम 'अक्षरम्' । सुबन्तं तिङन्तं च पदसंज्ञं स्यात् । सुप् - विभक्तिसहिताः शब्दाः सुबन्ताः । क्रियाबोधकाः शब्दाः तिङन्ताः इति । अधिकन्तु व्याकरण भागे द्रष्टव्यम् । योग्यताकाङ्क्षासत्तिसंयुक्तः पदसमुच्चयः वाक्यमित्युच्यते । उदाः- रामः फलं खादति ।

वर्णविचारमाश्रित्य वेदकालादेव प्रातिशाख्यग्रन्थेषु शिक्षाशास्त्रग्रन्थेषु निरुक्ते च बहवो विचाराः प्रतिपादिताः सन्ति । एतादृशी अत्यन्तप्राचीनतमा, श्रेष्ठतमा भाषा येन अधीयते तम् एव स्तुवन्ति 'वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते' । इति

### वर्णमाला

अ आ इ ई उ ऊ ऋ ॠ ऌ ए ऐ ओ औ → **स्वराः**

अं अः → **अयोगवाहौ**

क् ख् ग् घ् ङ्
च् छ् ज् झ् ञ्
ट् ठ् ड् ढ् ण् → **वर्गीयव्यञ्जनानि**
त् थ् द् ध् न्
प् फ् ब् भ् म्

य् र् ल् व् श् ष् स् ह् → **अवर्गीयव्यञ्जनानि**

संस्कृतभाषायां वर्णाः त्रिधा विभक्ताः स्वराः, अयोगवाहौ, व्यञ्जनानि चेति । स्वतन्त्ररूपेण उच्चारयितुं साध्याः **स्वराः** अ, ई प्रभृतयः । स्वराणां साहाय्येन उच्चरणीयाः वर्णाः **व्यञ्जनानि** क, च इत्यादयः । ये वर्णाः पूर्वं स्वराणां योगेनैव सिध्यन्ति तौ **अयोगवाहौ** यथा अं, अः इति कथ्यन्ते।

## स्वराः

**ह्रस्व स्वराः, दीर्घस्वराः, प्लुताश्च** इति स्वराः विभक्ताः । त्रयोदश स्वराः सन्ति । 'अ, इ, उ, ऋ, ऌ' इति पञ्च ह्रस्वस्वराः । आ, ई, ऊ, ॠ, ए, ऐ, ओ, औ इत्येते अष्टौ दीर्घस्वराः । ये स्वराः द्विमात्राकालात् अधिक कालेन उच्चार्यन्ते ते प्लुताः यथा आऽऽ, ईऽऽ ।

## व्यञ्जनानि

वर्गीयव्यञ्जनानि, अवर्गीयव्यञ्जनानि इति व्यञ्जनानि द्विधा विभक्तानि । व्यञ्जनानि यस्त्रिंशत् सन्ति । तेषु पञ्चविंशतिवर्णाः वर्गीयव्यञ्जनानि । अष्टौ अवर्गीयव्यञ्जनानि । कवर्गः, चवर्गः, टवर्गः, तवर्गः, पवर्गश्च इति प्रतिवर्गेऽपि पञ्च वर्णाः सन्ति । वर्गरहिताः वर्णाः अवर्गीयाः यकारादयः ।

## अयोगवाहौ

पूर्व स्वरयोगेन विना न वहति - उच्चर्यते इति हेतोः इमौ अयोगवाहौ । योगवाहौ इत्यपि एतेषां संज्ञा । स्वरयोगेन एव वहनात् , उच्चारात् इयं संज्ञा । अनुस्वारः, विसर्गः, जिह्वामूलीयः, उपध्मानीयश्चेति चत्वार अयोगवाहाः।

## अक्षरम्

क्षररहितम् अक्षरम् इति । अक्षरं वर्ण एव । वर्णः ध्वनिविशेषः । एषः नित्यः ।

कण्ठताल्वादि अभिघातेन व्यक्तो भवति । अतः अक्षरम् इति उच्यते । एतादृश अक्षरसूचक लिपिः अपि अक्षरपदेन व्यवह्रियते । मध्ये स्वरं विना व्यञ्जनयोः योगेन संयुक्ताक्षरं भवति । उदा - क्ष - क् + ष् + अ ज्ञ ज् + ञ् + अ ।

## माहेश्वरसूत्राणि

महेश्वरादागतानि माहेश्वराणि । **पाणिनीय व्याकरणशास्त्रे** शास्त्ररचनासौलभ्यार्थं विशिष्टरूपेण सूत्रशैल्या संस्कृतवर्णाः सङ्कलिताः । चतुर्दश सूत्राणि वर्तन्ते । संस्कृत व्याकरणज्ञानार्थं माहेश्वरसूत्राणि आवश्यकानि । एतानि अवश्यम् अवगन्तव्यानि ।

**१) अ इ उ ण् । २) ऋ लृ क् । ३) ए ओ ङ् । ४) ऐ औ च् । ५) ह य व र ट् । ६) ल ण् । ७) ञ म ङ ण न म् । ७) झ भ ञ् । ९) घ ढ ध ष् । १०) ज ब ग ड द श् । ११) ख फ छ ठ थ च ट त व् । १२) क प य् । १३) श ष स र् । १४) ह ल् ।**

## प्रत्याहाराः

प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णाः इति प्रत्याहाराः । माहेश्वरसूत्राणि आश्रित्य प्रत्याहाराः क्रियन्ते । अल्पैः अक्षरैः अधिकवर्णानाम् सूचनम् प्रत्याहारस्य उपयोगः । माहेश्वरसूत्रेषु अन्तिमो वर्णः 'इत्' संज्ञकः। उदाहरणार्थं 'अण्' इति एकः प्रत्याहारः । अत्र 'अ इ उ' इति वर्णाः अन्तर्भवन्ति । णकारः इत् भवति । एवमेव 'अच्' 'हल्' इति प्रत्याहारौ । अच् इति सर्वे स्वराः। हल् इति सर्वाणि व्यञ्जनानि ।

## स्थानप्रयत्नविवेकः

वर्णस्य उत्पत्तिस्थानं, उच्चारणार्थं कीदृशः यत्नः आवश्यको भवतीति विचारः अत्र विद्यते ।

कण्ठः, तालु, मूर्धा, दन्ताः, ओष्ठौ, नासिका, जिह्वामूलम् इति वर्णोत्पत्तिस्थानानि । यत्नः आभ्यन्तरः बाह्यः इति द्विधा ।

वर्णोत्पत्तिस्थानानि सुलभतया अवगन्तुम् इमानि सूत्ररूपाणि वाक्यानि उपयुक्तानि । अकुहविसर्जनीयानां कण्ठः । इचुयशानां तालु । ऋटुरषाणां मूर्धा । लृतुलसानां दन्ताः । उपूपध्मानीयानामोष्ठौ । ञमङणनानां नासिका च । एदैतोः कण्ठतालू । औदौतोः कण्ठोष्ठम् । वकारस्य दन्तोष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् । नासिका अनुस्वारस्य । वर्गाणां प्रथम- तृतीयपञ्चमाः यणश्च अल्पप्राणाः । वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः । यणोऽन्तस्थाः। शल ऊष्माणः । अचः स्वराः । हलः व्यञ्जनानि ।

| | | |
|---|---|---|
| अ आ क ख ग घ ङ ह (:) विसर्गः | - | कण्ठ्याः |
| इ ई च छ ज झ ञ य श | - | तालव्याः |
| ऋ ॠ ट ठ ड ढ ण र ष | - | मूर्धन्याः |
| लृ त थ द ध न ल स | - | दन्त्याः |
| उ ऊ प फ ब भ म (प् फ्) | - | ओष्ठ्याः |
| ञ म ङ ण न | - | नासिक्यः |
| ए ऐ | - | कण्ठतालव्यौ |
| ओ औ | - | कण्ठोष्ठौ |
| व | - | दन्तोष्ठः |
| (क्) (ख) | - | जिह्वामूलीयौ |
| (प्) (फ्) | - | उपध्मानीयौ |

* * *

# सन्धिः

द्वयोः वर्णयोः संयोगे कोऽपि विकारः परिलक्ष्यते चेत् तदा सन्धिः कार्यम् इति कथ्यते । **'परः सन्निकर्षः संहिता'** इति । द्वयोः वर्णयोः संयोगे कृतेऽपि विकारः न भवति तदा न तु सन्धिकार्यम्। सन्धिकार्ये त्रिप्रकारकाः विकाराः (परिवर्तनानि) भवन्ति-आगमः आदेशः लोपश्चेति । आगमः मित्रवद्भवति - यथा तस्मिन् + एव = तस्मिन्नेव। आदेशः शत्रुवद्भवति - यथा यण् इति + अपि = इत्यपि। अदर्शनं लोपः यथा - सः + गजः = स गजः । प्रसक्तस्य वर्णस्य अश्रवणं लोपः ।

सन्धिः त्रिप्रकारकः- स्वरसन्धिः, व्यञ्जनसन्धिः, विसर्गसन्धिश्चेति ।

## I. स्वरसन्धयः

संस्कृतव्याकरणे अच् प्रत्याहारः स्वरबोधकः । अतः स्वरसन्धिः, अच्सन्धिः इति कथ्यते । स्वरसन्धिषु सवर्णदीर्घसन्धिः गुणसन्धिः, वृद्धिसन्धिः, यण्सन्धिः, अयादि सन्धिः, पूर्वरूपसन्धिः इति प्रमुख सन्धयः वर्तन्ते ।

### १. सवर्णदीर्घसन्धिः

**'अकः सवर्णेदीर्घः'** इति सूत्रेण 'अ इ उ ऋ लृ वर्णानां सवर्णे अचि परे पूर्वपरयोः एकः सवर्णदीर्घः आदेशः भवेत् ।

**उदाहरणानि**

| | |
|---|---|
| अ + अ = आ | अक्षर + अभ्यासः = अक्षराभ्यासः । |
| इ + इ = ई | कवि + इन्द्रः = कवीन्द्रः । |
| उ + उ = ऊ | गुरु + उपदेशः = गुरूपदेशः |
| ऋ + ऋ = ऋ | मातृ + ऋणम् = मातॄणम् । |

### २. गुणसन्धिः

**'आद्गुणः'** इति सूत्रम् । अकारात् इकारे परे 'ए'कारः, उकारे परे 'ओ'कारः, ऋकारे परे 'अर्'कारश्च क्रमशः एकादेशः स्यात् ।

**उदाहरणानि -**

| | |
|---|---|
| अ+ इ = ए | उप + इन्द्रः = उपेन्द्रः । |

अ+ उ = ओ — गङ्गा + उदकम् = गङ्गोदकम् ।

अ+ ऋ = अर् — देव + ऋषिः = देवर्षिः ।

## ३. वृद्धिसन्धिः

**'वृद्धिरादैच्'** इति सूत्रानुसारेण अकारात् आकारात् वा 'ए', 'ऐ' कारयोः परयोः 'ऐ' कारः, 'ओ' 'औ'कारयोः परयोः 'औ'कारः एकादेशो भवति ।

| | |
|---|---|
| अ + ए = ऐ | अथ + एव = अथैव |
| आ + ए = ऐ | सा + एषा = सैषा |
| अ + ऐ = ऐ | देव + ऐश्वर्यम् = देवैश्वर्यम् |
| अ + ओ= औ | गुण+ ओघः = गुणौघः |
| अ + औ = औ | पर्वत + औन्नत्यम् = पर्वतौन्नत्यम् |

## ४. यण्सन्धिः

**'इको यणचि'** इति पाणिनीयं सूत्रम् । असवर्णे स्वरे परे इ, ईकारयोः स्थाने य्कारः, उ,ऊकायोः स्थाने वकारः, ऋ,ऋकारयोः रेफश्च क्रमशः आदेशत्वेन भवति ।

| | |
|---|---|
| इ + अ = य् + स्वरः | इति + अत्र = इत्यत्र |
| उ + अ = व् + स्वरः | वधु + आदेशः = वध्वादेशः । |
| ऋ, + अ = र् + स्वरः | मातृ + आज्ञा = मात्राज्ञा । |

## ५. पूर्वरूपसन्धिः

**'एङः पदान्तादति'** - पदान्तात् एकारात् 'अ'कारे परे पूर्वपरयोः स्थाने 'ए' कारः, ओकारात् 'अ'कारे परे पूर्वपरयोः स्थाने 'ओ' कारश्च क्रमशः एकादेशः स्यात् ।

| | |
|---|---|
| ए + अ = ए | हरे + अव = हरेऽव |
| ओ + अ = ओ | विष्णो + अव = विष्णोऽव । |

Revised Edition 2017

## II. व्यञ्जनसन्धयः

अचः स्वराः । हलः व्यञ्जनानि । इदानीं हल्सन्धीनां परिचयः क्रियते । व्यञ्जनात् व्यञ्जने परे अथवा केषुचित् स्वरेषु सत्सु व्यञ्जनसन्धिः भवति ।

### १. श्चुत्व सन्धिः

**'स्तोः श्चुना श्चुः'** इति सूत्रेण श्चुत्वसन्धिः भवति । सकार-तवर्गाक्षरयोः शकार-चवर्गाक्षराभ्यां योगे सकारस्य स्थाने शकारः, तवर्गाक्षरस्य स्थाने च चवर्गाक्षरः आदेशत्वेन भवति ।

स् + श् / च् छ् ज् झ् ञ् = श् + श् / च् छ् ज् झ् ञ् हरिस् + शेते = हरिश्शेते ।

कृष्णस् + च = कृष्णश्च

त् थ् द् ध् न् + श् / च् छ् ज् झ् ञ् = श् / च् छ् ज् झ् ञ् सत् + चित् = सच्चित् ।

### २. जश्त्वसन्धिः

**'झलां जशोऽन्ते'** इति सूत्रेण जश्त्वसन्धिः बोध्यते । पदान्ते विद्यमानात् वर्गीयव्यञ्जनात् परे स्वरे मृदुव्यञ्जने वा परे, एवमेव झल् वर्णात् झश् वर्णे परे वर्गस्य तृतीय वर्णाः 'जश्' प्रत्याहारेण ज्ञायन्ते। उदाः सम्य**क्** - सम्य**ग्**, त**त्**-त**द्** । झल् - अनुनासिकं विना सर्वाणि वर्गीयव्यञ्जनानि, हयवरल वर्णाश्च। झश् - वर्गीयव्यजनेषु तृतीय चतुर्थाक्षराणि ।

**उदाहरणानि -**

वाक् + ईश्वरी = वागीश्वरी ।

अच् + अन्तः = अजन्तः ।

षट् + आननः =षडाननः।

सत् + आनन्दः = सदानन्दः ।

तत् + धनम् = तद्धनम् ।

सुप् + अन्तः = सुबन्तः ।

## ३. अनुनासिकसन्धिः

**'यरोऽनुनासिकेऽनुनासिको वा'** इति सूत्रेण वर्गीयव्यञ्जनात् य व र ल श ष स वर्णात् अनुनासिके परे तत्तद्वर्गस्य अनुनासिकः आदिष्टः भवति ।

क् → ङ्   च् → ञ्

ट् → ण्   त् → न्

प् → म्

**उदाहरणानि -**

वाक् + मयम् = वाङ्मयम् ।

चित् + मात्रम् = चिन्मात्रम् ।

यत् + मनसाः = यन्मनसा ।

सम्राट् + नयति = सम्राण्नयति ।

षट् + मुखम् = षण्मुखम् ।

* * *

# अजन्तशब्दाः

## १. अकारान्त पुंलिङ्गः 'राम' शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा विभक्तिः** | रामः | रामौ | रामाः |
| **सम्बोधना प्रथमा विभक्तिः** | हे राम | हे रामौ | हे रामाः |
| **द्वितीया विभक्तिः** | रामम् | रामौ | रामान् |
| **तृतीया विभक्तिः** | रामेण | रामाभ्याम् | रामैः |
| **चतुर्थी विभक्तिः** | रामाय | रामाभ्याम् | रामेभ्यः |
| **पञ्चमी विभक्तिः** | रामात् | रामाभ्याम् | रामेभ्यः |
| **षष्ठी विभक्तिः** | रामस्य | रामयोः | रामाणाम् |
| **सप्तमी विभक्तिः** | रामे | रामयोः | रामेषु |

## २. इकारान्तः पुंलिङ्गः 'कवि' शब्दः

| | | |
|---|---|---|
| कविः | कवी | कवयः |
| हे कवे | हे कवी | हे कवयः |
| कविम् | कवी | कवीन् |
| कविना | कविभ्याम् | कविभिः |
| कवये | कविभ्याम् | कविभ्यः |
| कवेः | कविभ्याम् | कविभ्यः |
| कवेः | कव्योः | कवीनाम् |
| कवौ | कव्योः | कविषु |

## ३. उकारान्त पुंलिङ्गः 'गुरु' शब्दः

| | | |
|---|---|---|
| गुरुः | गुरू | गुरवः |
| हे गुरो | हे गुरू | हे गुरवः |
| गुरुम् | गुरू | गुरून् |
| गुरुणा | गुरुभ्याम् | गुरुभिः |
| गुरवे | गुरुभ्याम् | गुरुभ्यः |
| गुरोः | गुरुभ्याम् | गुरुभ्यः |
| गुरोः | गुर्वोः | गुरूणाम् |
| गुरौ | गुर्वोः | गुरुषु |

### ४. ऋकारान्तः पुंलिङ्गः 'पितृ' शब्दः

| | | |
|---|---|---|
| पिता | पितरौ | पितरः |
| हे पितः | हे पितरौ | हे पितरः |
| पितरम् | पितरौ | पितॄन् |
| पित्रा | पितृभ्याम् | पितृभिः |
| पित्रे | पितृभ्याम् | पितृभ्यः |
| पितुः | पितृभ्याम् | पितृभ्यः |
| पितुः | पित्रोः | पितॄणाम् |
| पितरि | पित्रोः | पितृषु |

### ५. आकारान्त स्त्रीलिङ्गः 'लता' शब्दः

| | | |
|---|---|---|
| लता | लते | लताः |
| हे लते | हे लते | हे लताः |
| लताम् | लते | लताः |
| लतया | लताभ्याम् | लताभिः |
| लतायै | लताभ्याम् | लताभ्यः |
| लतायाः | लताभ्याम् | लताभ्यः |
| लतायाः | लतयोः | लतानाम् |
| लतायाम् | लतयोः | लतासु |

### ६. ईकारान्तः स्त्रीलिङ्गः 'नदी' शब्दः

| | | |
|---|---|---|
| नदी | नद्यौ | नद्यः |
| हे नदि | हे नद्यौ | हे नद्यः |
| नदीम् | नद्यौ | नदीः |
| नद्या | नदीभ्याम् | नदीभिः |
| नद्यै | नदीभ्याम् | नदीभ्यः |
| नद्याः | नदीभ्याम् | नदीभ्यः |
| नद्याः | नद्योः | नदीनाम् |
| नद्याम् | नद्योः | नदीषु |

### ७. ऊकारान्तः स्त्रीलिङ्गः 'वधू' शब्दः

| | | |
|---|---|---|
| वधूः | वध्वौ | वध्वः |
| हे वधु | हे वध्वौ | हे वध्वः |
| वधूम् | वध्वौ | वधूः |
| वध्वा | वधूभ्याम् | वधूभिः |
| वध्वै | वधूभ्याम् | वधूभ्यः |
| वध्वाः | वधूभ्याम् | वधूभ्यः |
| वध्वाः | वध्वोः | वधूनाम् |
| वध्वाम् | वध्वोः | वधुषु |

## ८. ऋकारान्त स्त्रीलिङ्गः 'मातृ' शब्दः

| | | |
|---|---|---|
| माता | मातरौ | मातरः |
| हे मातः | हे मातरौ | हे मातरः |
| मातरम् | मातरौ | मातॄः |
| मात्रा | मातृभ्याम् | मातृभिः |
| मात्रे | मातृभ्याम् | मातृभ्यः |
| मातुः | मातृभ्याम् | मातृभ्यः |
| मातुः | मात्रोः | मातॄणाम् |
| मातरि | मात्रोः | मातृषु |

## ९. अकारान्तः नपुंसकलिङ्गः 'वन' शब्दः

| | | |
|---|---|---|
| वनम् | वने | वनानि |
| हे वन | हे वने | हे वनानि |
| वनम् | वने | वनानि |
| वनेन | वनाभ्याम् | वनैः |
| वनाय | वनाभ्याम् | वनेभ्यः |
| वनात् | वनाभ्याम् | वनेभ्यः |
| वनस्य | वनयोः | वनानाम् |
| वने | वनयोः | वनेषु |

## १०. इकारान्त नपुंसकलिङ्गः 'वारि' शब्दः

| | | |
|---|---|---|
| वारि | वारिणी | वारीणि |
| हे वारे/हे वारि | हे वारिणी | हे वारीणि |
| वारि | वारिणी | वारीणि |
| वारिणा | वारिभ्याम् | वारिभिः |
| वारिणे | वारिभ्याम् | वारिभ्यः |
| वारिणः | वारिभ्याम् | वारिभ्यः |
| वारिणः | वारिणोः | वारीणाम् |
| वारिणि | वारिणोः | वारिषु |

## ११. न कारान्त पुंलिङ्गः 'राजन्' शब्दः

| | | |
|---|---|---|
| राजा | राजानौ | राजानः |
| हे राजन् | हे राजानौ | हे राजानः |
| राजानम् | राजानौ | राज्ञः |
| राज्ञा | राजभ्याम् | राजभिः |
| राज्ञे | राजभ्याम् | राजभ्यः |
| राज्ञः | राजभ्याम् | राजभ्यः |
| राज्ञः | राज्ञोः | राज्ञाम् |
| राज्ञि/राजनि | राज्ञोः | राजसु |

**१२. शकारान्तः स्त्रीलिङ्गः 'दिश्' शब्दः**

| | | |
|---|---|---|
| दिक्-दिग् | दिशौ | दिशः |
| हे दिक्-हे दिग् | हे दिशौ | हे दिशः |
| दिशम् | दिशौ | दिशः |
| दिशा | दिग्भ्याम् | दिग्भिः |
| दिशे | दिग्भ्याम् | दिग्भ्यः |
| दिशः | दिग्भ्याम् | दिग्भ्यः |
| दिशः | दिशोः | दिशाम् |
| दिशि | दिशोः | दिक्षु |

**१३. सकारान्तः नपुंसकलिङ्गः 'मनस्' शब्दः**

| | | |
|---|---|---|
| मनः | मनसी | मनांसि |
| हे मनः | हे मनसी | हे मनासि |
| मनः | मनसी | मनांसि |
| मनसा | मनोभ्याम् | मनोभिः |
| मनसे | मनोभ्याम् | मनोभ्यः |
| मनसः | मनोभ्याम् | मनोभ्यः |
| मनसः | मनसोः | मनसाम् |
| मनसि | मनसोः | मनस्सु |

* * *

# सर्वनामशब्दाः

## १४. दकारान्त पुंलिङ्गः 'तद्' शब्दः

| | | |
|---|---|---|
| सः | तौ | ते |
| तम् | तौ | तान् |
| तेन | ताभ्याम् | तैः |
| तस्मै | ताभ्याम् | तेभ्यः |
| तस्मात् | ताभ्याम् | तेभ्यः |
| तस्य | तयोः | तेषाम् |
| तस्मिन् | तयोः | तेषु |

## १५. दकारान्तः स्त्रीलिङ्गः 'तद्' शब्दः

| | | |
|---|---|---|
| सा | ते | ताः |
| ताम् | ते | ताः |
| तया | ताभ्याम् | ताभिः |
| तस्यै | ताभ्याम् | ताभ्यः |
| तस्याः | ताभ्याम् | ताभ्यः |
| तस्याः | तयोः | तासाम् |
| तस्याम् | तयोः | तासु |

## १६. दकारान्त नपुसंकलिङ्गः 'तद्' शब्दः

| | | |
|---|---|---|
| तत् | ते | तानि |
| तत् | ते | तानि |
| तेन | ताभ्याम् | तैः |
| तस्मै | ताभ्याम् | तेभ्यः |
| तस्मात् | ताभ्याम् | तेभ्यः |
| तस्य | तयोः | तेषाम् |
| तस्मिन् | तयोः | तेषु |

## १७. मकारान्तः पुंलिङ्ग 'किम्' शब्दः

| | | |
|---|---|---|
| कः | कौ | के |
| कम् | कौ | कान् |
| केन | काभ्याम् | कैः |
| कस्मै | काभ्याम् | केभ्यः |
| कस्मात् | काभ्याम् | केभ्यः |
| कस्य | कयोः | केषाम् |
| कस्मिन् | कयोः | केषु |

## १८. मकारान्त स्त्रीलिङ्गः 'किम्' शब्दः

| | | |
|---|---|---|
| का | के | काः |
| काम् | के | काः |
| कया | काभ्याम् | काभिः |
| कस्यै | काभ्याम् | काभ्यः |
| कस्याः | काभ्याम् | काभ्यः |
| कस्याः | कयोः | कासाम् |
| कस्याम् | कयोः | कासु |

## १९. मकारान्तः नपुंसकलिङ्गः 'किम्' शब्दः

| | | |
|---|---|---|
| किम् | के | कानि |
| किम् | के | कानि |
| केन | काभ्याम् | कैः |
| कस्मै | काभ्याम् | केभ्यः |
| कस्मात् | काभ्याम् | केभ्यः |
| कस्य | कयोः | केषाम् |
| कस्मिन् | कयोः | केषु |

## २०. दकारान्तःत्रिलिङ्गः 'अस्मद्' शब्दः

| | | |
|---|---|---|
| अहम् | आवाम् | वयम् |
| माम्/मा | आवाम्/नौ | आस्मान्/नः |
| मया | आवाभ्याम् | अस्माभिः |
| मह्यम्/मे | आवाभ्याम्/नौ | अस्मभ्यम्/नः |
| मत् | आवाभ्याम् | अस्मत् |
| मम/मे | आवयोः/नौ | अस्माकम्/नः |
| मयि | आवयोः | अस्मासु |

## २१. द्कारान्तःत्रिलिङ्गः 'युष्मद्' शब्दः

| | | |
|---|---|---|
| त्वम् | युवाम् | यूयम् |
| त्वाम्/त्वा | युवाम् / वाम् | युष्मान् / वः |
| त्वया | युवाभ्याम् | युष्माभिः |
| तुभ्यम्/ते | युवाभ्याम् / वाम् | युष्मभ्यम् / वः |
| त्वत् | युवाभ्याम् | युष्मत् |
| तव/ते | युवयोः / वाम् | युष्माकम् / वः |
| त्वयि | युवयोः | युष्मासु |

* * *

# क्रियापदानि

क्रियापदस्यमूलरूपं 'धातुः' इति कथ्यते । क्रियाबोधकानि अक्षराणि अक्षरसमूहो वा धातुरिति अभिधीयते । 'भूवादयो धातवः' इति सूत्रेण धातवः निर्दिष्टाः सन्ति । धातु-विकरण-तिङ् प्रत्यययोगेन तिङन्तानि अथवा क्रियापदानि सिध्यन्ति ।

संस्कृतभाषायां प्रायः द्विसहस्राधिकाः धातवः सन्ति ।

भ्वाद्यदादी जुहोत्यादिः दिवादिः स्वादिरेव च ।

तुदादिश्च रुधादिश्च तनक्र्यादिचुरादयः ।।

इति ते दशगणेषु निविष्टाः ।

धातवः परस्मैपदिनः, आत्मनेपदिनः, उभयपदिनश्चेति पुनस्त्रिधा विभक्ताः । एकैकोऽपि धातुः दशलकारेषु, त्रिषु वचनेषु च विभिन्नानि रूपाणि भजते । लट्, लिट्, लुट्, लृट्, लेट्, लङ्, लिङ्, लुङ्, लृङ् इति च दशलकाराः भवन्ति । लेट् लकारस्य प्रयोगः वेदेषु भवति । प्रथमः, मध्यमः उत्तमश्चेति पुरुषत्रयं, एक-द्वि-बहुवचनमिति वचनत्रयं च वर्तते ।

लट्-वर्तमानकालः, लिट्-परोक्षभूतकालः, लङ्-अनद्यतनभूतकालः, लोट्-आज्ञार्थकः, लृट् भविष्यत्कालार्थकश्च भवन्तीमे लकाराः । अत्र लट्, लिट्, लङ्, लोट् रूपाणि प्रदर्शितानि ।

| | **गणनाम** | **धातुः** | **विकरणप्रत्ययः** | **लट् रूपम्** |
|---|---|---|---|---|
| १. | **भ्वादिः** | भू/लभ् | अ | भवति/लभते |
| २. | **अदादिः** | अद्/आस् | --- | अत्ति/आस्ते |
| ३. | **जुहोत्यादिः** | हू/हा | --- | जुहोति/जहीते |
| ४. | **दिवादिः** | नृती/युध् | य | नृत्यति/युध्यते |
| ५. | **स्वादिः** | सु/धुञ् | नु | सुनोति/धुनुते |
| ६. | **तुदादिः** | तुद्/लस्ज् | अ | तुदति/लज्जते |
| ७. | **रुधादयः** | रुध् | न | रुणद्धि/रुन्धे |

| | | | | |
|---|---|---|---|---|
| ८. | **तनादिः** | तन्/मन् | उ | तनोति/मनुते |
| ९. | **क्रयादयः** | क्री/वृ | न | क्रीणाति/वृणीते |
| १०. | **चुरादिः** | चुर्/मृग् | अय् | चोरयति/मृगयते |

१, ४, ६, १० गणानां धातवः परिचयार्थमत्र स्वीकृताः सन्ति ।

**भू सत्तायाम् - परस्मैपदी भू + अ + ति = भवति**

**वर्तमाने लट् लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | भवति | भवतः | भवन्ति |
| **मध्यमपुरुषः** | भवसि | भवथः | भवथ |
| **उत्तमपुरुषः** | भवामि | भवावः | भवामः |

**डुलभुष् प्राप्तौ-आत्मनेपदी**

**वर्तमाने लट् लकारः लभ् + अ + ते = लभते**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | लभते | लभेते | लभन्ते |
| **मध्यमपुरुषः** | लभसे | लभेथे | लभध्वे |
| **उत्तमपुरुषः** | लभे | लभावहे | लभामहे |

| **अनद्यतनभूते लङ् लकारः** | | | **अनद्यतनभूते लङ् लकारः** | | |
|---|---|---|---|---|---|
| अभवत् | अभवताम् | अभवन् | अलभत | अलभेताम् | अलभन्त |
| अभवः | अभवतम् | अभवत | अलभथाः | अलभेथाम् | अलभध्वम् |
| अभवम् | अभवाव | अभवाम | अलभे | अलभावहि | अलभामहि |

| आज्ञायां लोट् लकारः | | | आज्ञायां लोट् लकारः | | |
|---|---|---|---|---|---|
| भवतु-भवतात् | भवताम् | भवन्तु | लभताम् | लभेताम् | लभन्ताम् |
| भव-भवतात् | भवतम् | भवत | लभस्व | लभेथाम् | लभध्वम् |
| भवानि | भवाव | भवाम | लभै | लभावहै | लभामहै |

* * *

# उपसर्गाः

उपसर्गः धात्वर्थं द्योतयति । अत एव उपसर्गयोगेण धात्वर्थभेदः भवति । तदुक्तं उपसर्गेण धात्वर्थः बलादन्यत्र नीयते इति ।

उपसर्गः त्रिधा अर्थभेदं गमयति ।

**धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते ।**

**तमेव विशिनष्ट्यन्यः उपसर्गगतिस्त्रिधा ।।**

(i) कश्चित् उपसर्गः धात्वर्थं बाधते । यथा- गच्छति - आगच्छति ।

(ii) कश्चिदुपसर्गः धात्वर्थम् अनुवर्तते । यथा - वदति - अनुवदति ।

(iii) अन्यः उपसर्गः धात्वर्थं विशेषयति । यथा - वदति-प्रवदति ।

संस्कृतभाषायां २२ उपसर्गाः सन्ति । ते - प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप - एते प्रादयः ।

**श्लोक एषः गमनार्हः -**

**उपसर्गेण धात्वर्थः बलादन्यत्र नीयते ।**

**प्रहाराहारसंहारविहारपरिहारवत् ।।**

| | उपसर्गः | धातुः | क्रियापदम् | अर्थः |
|---|---|---|---|---|
| १. | आ | गम् | आगच्छति | आगमनम् |
| २. | **प्र** | **हृ** | **प्रहरति** | **ताडनम्** |
| ३. | **अव** | **ज्ञा** | **अवजानाति** | **तिरस्कारः** |

* * *

# कृदन्ताः

कृत् अन्ते वर्तते यस्य सः कृदन्तः । धातोः न केवलं तिङ् प्रत्ययाः विधीयन्ते , धातोः विहिताः तिङ् भिन्नप्रत्ययाः 'कृत्' प्रत्ययाः इति कथ्यन्ते। धातोः तिङ् प्रत्ययविधाने तत्तत्कालिक क्रिया गम्यते यथा - गच्छति । किन्तु कृत् प्रत्ययविधाने तत्तत्कालिक क्रियावान् गम्यते यथा - गच्छन् ।'कृत्तद्धित समासाश्च' इति विशेषसूत्रेण अस्य प्रातिपदिकसंज्ञा विधीयते । कृदन्तपदानि, नामपदानि विशेषणानि अव्ययानि वा भवन्ति ।

कृत् प्रत्ययाः कर्त्रर्थे विधीयन्ते चेत् कर्तरि कृदन्ताः, कर्मार्थे विधीयमानेषु कर्मणिकृदन्ताः, भावार्थे च भावेकृदन्ताः इति कथ्यन्ते ।

१. वर्तमानकृदन्तः (Present Participle)

२. भूतकृदन्तः (Past Participle)

३. भविष्यत् कृदन्तः (Future Participle)

४. विध्यर्थककृदन्तः (Potential Participle)

५. कृदन्ताव्ययानि

एषु तुमुन्-क्त्वा-ल्यपः अव्ययानि ।

वर्तमानकृदन्ततः विध्यर्थककृदन्तपर्यन्तं प्रातिपादिकानि भवन्ति । तस्मात् सुप् प्रत्ययाः विधीयन्ते।

## १. शतृ (अत्) प्रत्ययः (Present participle)

अयं 'शतृ' प्रत्ययः परस्मैपदिधातुभ्यः कर्त्रर्थे विधीयन्ते । यः धातुवाच्यक्रियावान् सः शत्रन्तपदस्य अर्थः । यथा - पठन् - पठन रूपक्रियावान् ।

उदा - **पुंलिङ्गः** - **पठन् बालः उत्तीर्णो भवति ।**

**स्त्रीलिङ्गः** - **खादन्ती बालिका कूपे पतति ।**

**नपुंसकलिङ्गः** - **गच्छद्वाहनं कम्पते ।**

| | | | | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|---|---|---|
| **पठ्** | + | शतृ | = | पठन् | पठन्ती | पठत् |
| **लिख्** | + | शतृ | = | लिखन् | लिखन्ती | लिखत् |
| **पा** | + | शतृ | = | पिबन् | पिबन्ती | पिबत् |
| **हस्** | + | शतृ | = | हसन् | हसन्ती | हसत् |
| **रुद्** | + | शतृ | = | रुदन् | रुदन्ती | रुदत् |
| **खाद्** | + | शतृ | = | खादन् | खादन्ती | खादत् |
| **त्यज्** | + | शतृ | = | त्यजन् | त्यजन्ती | त्यजत् |
| **वद्** | + | शतृ | = | वदन् | वदन्ती | वदत् |
| **पत्** | + | शतृ | = | पतन् | पतन्ती | पतत् |
| **जीव्** | + | शतृ | = | जीवन् | जीवन्ती | जीवत् |

## २. शानच् (आन) प्रत्ययः(Present participle)

आत्मनेपदिनः धातुभ्यः अयं 'शानच्' प्रत्ययः प्रयुज्यते । एषः अपि त्रिष्वपि लिङ्गेषु विधीयते अन्ते आनः / मानः, आना / माना, आनम् / मानम् वा अवशिष्यते । शानजन्तशब्दोपि लिङ्गत्रयेषु क्रमशः रूपाणि भजते ।

उदा - **पुंलिङ्गः** - **वन्दमानः छात्रः यशस्वी भवति ।**

**स्त्रीलिङ्गः** - **वर्धमाना तरुणी मनः कर्षति ।**

**नपुंसकलिङ्गः** - **शोभमानं गृहं दहति ।**

| | | | | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|---|---|---|
| **वन्द्** | + | शानच् | = | वन्दमानः | वन्दमाना | वन्दमानम् |
| **वृ** | + | शानच् | = | वर्धमानः | वर्धमाना | वर्धमानम् |

| | | | | | | |
|---|---|---|---|---|---|---|
| **कृ** | + | शानच् | = | कुर्वाणः | कुर्वाणा | कुर्वाणम् |
| **शुभ्** | + | शानच् | = | शोभमानः | शोभमाना | शोभमानम् |
| **एध्** | + | शानच् | = | एधमानः | एधमाना | एधमानम् |
| **धाव्** | + | शानच् | = | धावमानः | धावमाना | धावमानम् |
| **विद्** | + | शानच् | = | विद्यमानः | विद्यमाना | विद्यमानम् |
| **जीव्** | + | शानच् | = | जीवमानः | जीवमाना | जीवमानम् |
| **नी** | + | शानच् | = | नीयमानः | नीयमाना | नीयमानम् |
| **दण्ड्** | + | शानच् | = | दण्ड्यमानः | दण्ड्यमाना | दण्ड्यमानम् |

### ३. क्त-प्रत्ययः (त)

'क्त' प्रत्ययान्तः शब्दः क्तान्तः । 'क्त' प्रत्ययः भूतकाले कर्मार्थे धातोः विधीयते । क्तान्तः प्रातिपदिकं भवति । तस्मात् सुप् प्रत्ययः विधीयते । एषः प्रत्ययः सकर्मकधातुभ्यः कर्त्रर्थे-कर्मार्थे, तथा च अकर्मकधातुभ्यः कर्त्रर्थे-भावार्थे वा विधीयते । क्तप्रत्ययान्तशब्दस्य लिङ्गत्रये रूपाणि यथा -

उदा - **पुंलिङ्गः** - **वनं गतः रामः गङ्गां पश्यति ।**

**स्त्रीलिङ्गः** - **धनं लब्धा ललना सुखं शेते ।**

**नपुंसकलिङ्गः** - **दृष्टं मित्रम् आलिङ्गति ।**

| | | | | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|---|---|---|
| **भू** | + | क्त | = | भूतः | भूता | भूतम् |
| **गम्** | + | क्त | = | गतः | गता | गतम् |
| **वन्द्** | + | क्त | = | वन्दितः | वन्दिता | वन्दितम् |
| **लभ्** | + | क्त | = | लब्धः | लब्धा | लब्धम् |
| **दृश्** | + | क्त | = | दृष्टः | दृष्टा | दृष्टम् |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| **ताड्** | + | क्त | = | ताडितः | ताडिता | ताडितम् |
| **पत्** | + | क्त | = | पतितः | पतिता | पतितम् |
| **स्मृ** | + | क्त | = | स्मृतः | स्मृता | स्मृतम् |
| **श्रु** | + | क्त | = | श्रुतः | श्रुता | श्रुतम् |
| **वच्** | + | क्त | = | उक्तः | उक्ता | उक्तम् |
| **इष्ट** | + | क्त | = | इष्टः | इष्टा | इष्टम् |

## ४. क्तवतु-प्रत्ययः (क्तवतु)

'क्तवतु' प्रत्ययान्तः शब्दः क्तवत्वन्तः । धातोः विधानात् एतत्प्रत्ययान्तं प्रातिपदिकं भवति। ततः सुप् प्रत्ययाः विधीयन्ते । सर्वेभ्यः धातुभ्यः कर्त्रर्थे भूतकाले च अयं प्रत्ययः विधीयते। त्रिषु लिङ्गेषु रूपान्तराणि यथा -

उदा - **पुंलिङ्गः** - **नगरं गतवान् जनकः विस्मितः ।**

**स्त्रीलिङ्गः** - **पुत्रैः वन्दितवती माता रोमाञ्चिता ।**

**नपुंसकलिङ्गः** - **दृष्टवत् धनं को वा न हरति ?**

| | | | | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|---|---|---|
| **भू** | + | क्तवतु | = | भूतवान् | भूतवती | भूतवत् |
| **गम्** | + | क्तवतु | = | गतवान् | गतवती | गतवत् |
| **वन्द्** | + | क्तवतु | = | वन्दितवान् | वन्दितवती | वन्दितवत् |
| **लभ्** | + | क्तवतु | = | लब्धवान् | लब्धवती | लब्धवत् |
| **दृश्** | + | क्तवतु | = | दृष्टवान् | दृष्टवती | दृष्टवत् |
| **पत्** | + | क्तवतु | = | पतितवान् | पतितवती | पतितवत् |
| **स्मृ** | + | क्तवतु | = | स्मृतवान् | स्मृतवती | स्मृतवत् |
| **श्रु** | + | कतवतु | = | श्रुतवान् | श्रुतवती | श्रुतवत् |

| | | | | | | |
|---|---|---|---|---|---|---|
| **वच्** | + | क्तवतु | = | उक्तवान् | उक्तवती | उक्तवत् । |
| **इष्** | + | क्तवतु | = | इष्टवान् | इष्टवती | इष्टवत् |

## ५. तव्यत्-तव्य-अनीयर् प्रत्ययाः (Used in potential mood)

सकर्मकधातोः कर्मार्थे, अकर्मकधातोः भावार्थे च धातुभ्यः तव्यदादयः प्रत्ययाः प्रयुज्यन्ते। एतदन्तानि पदानि अपि प्रातिपदिकानि एव । ततः सुप् प्रत्ययाः विधीयन्ते । अतः लिङ्गत्रये रूपान्तराणि भवन्ति । यथा-

उदा - **पुंलिङ्गः** - **गन्तव्यः मार्गः परिशीलनीयः ।**

**स्त्रीलिङ्गः** - **गन्तव्या लमा इति निश्चिनोति हनूमान् ।**

**नपुंसकलिङ्गः** - **गन्तव्यं गृहं न त्यक्तव्यम् ।**

**पुंलिङ्गः** - **गम्यः देशः वरणीयः ।**

**स्त्रीलिङ्गः** - **गम्या नदी स्नानाय योग्या भवेत् ।**

**नपुंसकलिङ्गः** - **गम्यं भवनं प्रविशेत् ।**

| | | | | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|---|---|---|
| **गम्** | + | तव्य | = | गन्तव्यः | गन्तव्या | गन्तव्यम् |
| **गम्** | + | अनीय | = | गमनीयः | गमनीया | गमनीयम् |
| **गम्** | + | य | = | गम्यः | गम्या | गम्यम् |

### अ. तव्यत् प्रत्ययः

| | | | | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|---|---|---|
| **गम्** | + | तव्यत् | = | गन्तव्यः | गन्तव्या | गन्तव्यम् |
| **लिख्** | + | तव्यत् | = | लिखितव्यः | लिखितव्या | लिखितव्यम् |
| **पठ्** | + | तव्यत् | = | पठितव्यः | पठितव्या | पठितव्यम् |
| **भुज्** | + | तव्यत् | = | भोक्तव्यः | भोक्तव्या | भोक्तव्यम् |

Revised Edition 2017

| | | | | | | |
|---|---|---|---|---|---|---|
| **ताड्** | + | तव्यत् | = | ताडितव्यः | ताडितव्या | ताडितव्यम् |
| **वस्** | + | तव्यत् | = | वस्तव्यः | वस्तव्या | वस्तव्यम् |
| **कृ** | + | तव्यत् | = | कर्तव्यः | कर्तव्या | कर्तव्यम् |
| **नी** | + | तव्यत् | = | नेतव्यः | नेतव्या | नेतव्यम् |
| **वद्** | + | तव्यत् | = | वक्तव्यः | वक्तव्या | वक्तव्यम् |
| **पत्** | + | तव्यत् | = | पतितव्यः | पतितव्या | पतितव्यम् |
| **वप्** | + | तव्यत् | = | वपुत्पव्यः | वपुत्पव्या | वपुत्पव्यम् |
| **लभ्** | + | तव्यत् | = | लब्धव्यः | लब्धव्या | लब्धव्यम् |
| **बुध्** | + | तव्यत् | = | बोद्धव्यः | बोद्धव्या | बोद्धव्यम् |

६. **अनीयर् प्रत्ययः**

उदा - **पुंलिङ्गः** - **आजीवनं वेदाभ्यासः करणीयः ।**

**स्त्रीलिङ्गः** - **गमनीया सभा इति पाण्डवाः आदिष्टाः ।**

**नपुंसकलिङ्गः** - **परीक्षायां निर्दुष्टम् उत्तरं लेखनीयम् ।**

| | | | | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|---|---|---|
| **गम्** | + | अनीयर् | = | गमनीयः | गमनीया | गमनीयम् |
| **लिख्** | + | अनीयर् | = | लेखनीयः | लेखनीया | लेखनीयम् |
| **पठ्** | + | अनीयर् | = | पठनीयः | पठनीया | पठनीयम् |
| **भुज्** | + | अनीयर् | = | भोजनीयः | भोजनीया | भोजनीयम् |
| **ताड्** | + | अनीयर् | = | ताडनीयः | ताडनीया | ताडनीयम् |
| **वस्** | + | अनीयर् | = | वसनीयः | वसनीया | वसनीयम् |
| **कृ** | + | अनीयर् | = | करणीयः | करणीया | करणीयम् |
| **नी** | + | अनीयर् | = | नयनीयः | नयनीया | नयनीयम् |

### ७. यत् प्रत्ययः

उदा - **पुंलिङ्गः** - **महात्मनां प्रबन्धः पठ्यः भवति ।**

**स्त्रीलिङ्गः** - **राज्ञां शासने समयानुसारं भेरी ताड्या आसीत् ।**

**नपुंसकलिङ्गः** - **बकासुराय शकट वाह्यम् ओदनं नेयम् आसीत् ।**

| | | | | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|---|---|---|
| **गम्** | + | यत् | = | गम्यः | गम्या | गम्यम् |
| **पठ्** | + | यत् | = | पठनीयः | पठनीया | पठनीयम् |
| **भुज्** | + | यत् | = | भोज्यः | भोज्या | भोज्यम् |
| **ताड्** | + | यत् | = | ताड्यः | ताड्या | ताड्यम् |
| **नी** | + | यत् | = | नेयः | नेया | नेयम् |

## कृदन्ताव्ययानि

यथा धातोः तिङ् प्रत्ययाः भवन्ति तथा कृत् प्रत्ययाः अपि भवन्ति । कृदन्ताव्ययेषु-क्त्वा, तुमुन्, ल्यप्, णमुल्, एतेषां अव्ययानां परिचयः संक्षेपतः अत्र कार्यते ।

### १. क्त्वान्ताव्ययम् :-

द्वयोः क्रिययोः समानकर्तृकत्वे पूर्वक्रियावाचकधातोः 'क्त्वा' प्रत्ययः भवति ।

उदा :- बालः शालां गच्छति ततः पाठं पठति ।

अत्र बालः गमनक्रियां, पठनक्रियां च करोति । अतः प्रथमक्रियावाचक 'गम्' धातोः क्त्वा प्रत्ययः विधीयते । यथा - बालः शालां गत्वा पाठं पठति ।

बालः पाठं पठति ततः शालां गच्छति चेत् पूर्वक्रियावाचका पठ् धातोः क्त्वा प्रत्ययः भवति तदा बालः पाठं पठित्वा शालां गच्छति इति प्रयोगः ।

लिख् + इ + क्त्वा = लिखित्वा

कृ + क्त्वा = कृत्वा ग्रह् + क्त्वा = गृहीत्वा

नम् + क्त्वा = नत्वा लिख् + क्त्वा = लिखित्वा

नी + क्त्वा = नीत्वा श्रु + क्त्वा = श्रुत्वा

ज्ञा + क्त्वा = ज्ञात्वा पा + क्त्वा = पीत्वा

नृत् + क्त्वा = नर्तित्वा खन् + क्त्वा = खनित्वा

दा + क्त्वा = दत्त्वा प्रच्छ् + क्त्वा = पृष्ट्वा

रुद् + क्त्वा = रुदित्वा धृ + क्त्वा = धृत्वा

## २. ल्यबन्ताव्ययम् (Gerund)

यदि धातुः उपसर्ग सहितः भवति तदा 'क्त्वा' प्रत्ययस्य स्थाने 'ल्यप्' आदेशः भवति ।

उदा :- तरुणः मन्दिरम् आगत्य देवं नमति।

कुसुमश्रीः कथाम् **आकर्ण्य** गृहं गच्छति।

एवमेव - वि + ज्ञा + ल्यप् = विज्ञाय नि + पा + ल्यय् = निपीय

उप + विश् + ल्यप् = उपविश्य प्र + विश् + ल्यप् = प्रविश्य

आ + नी + ल्यप् = आनीय वि + लिख् + ल्यप् = विलिख्य

आ + गम् + ल्यप् = आगत्य स्वी + कृ + ल्यप् = स्वीकृत्य

प्र + नम् + ल्यप् = प्रणम्य उप + कृ + ल्यप् = उपकृत्य

सं+स्था + ल्यप् = संस्थाप्य उत् + स्था + ल्यप् = उत्थाय

वि + हस् + ल्यप् = विहस्य वि + हा + ल्यप् = विहाय

### ३. तुमुन्नन्ताव्ययम् (Infinitive)

धातोः तुमुन् प्रत्ययोगेन तुमुन्नन्ताव्ययं सिद्ध्यति । क्रियामेकाम् उद्दिश्य यदा क्रियान्तरं उल्लिख्यते तदा भविष्यदर्थे तुमुन् प्रत्ययो भवति ।

उदा :- अहं संस्कृताध्यनं **कर्तुम्** इच्छामि ।

यूयं पाठं **श्रोतुं** शालां गच्छत ।

| | | |
|---|---|---|
| एवमेव - | भू + तुम् = भवितुम् | श्रुण्+ तुम् = श्रोतुम् |
| | नम् + तुम् = नन्तुम् | स्था + तुम् = स्थातुम् |
| | भ्रम् + तुम् = भ्रमितुम् | क्री + तुम् = क्रेतुम् |
| | क्रीड् + तुम् = क्रीडितुम् | ग्रह् + तुम् = ग्रहीतुम् |
| | ज्ञा + तुम् = ज्ञातुम् | उपविश् + तुम् = उपवेष्टुम् |
| | नृत् + तुम् = नर्तितुम् | मिल् + तुम् = मेलितुम् |
| | पा + तुम् = पातुम् | दा + तुम् = दातुम् । |

### ४. णमुलन्ताव्ययानि :-

धातुभ्यः पौनःपुन्यार्थे णमुल् (अम्) प्रत्ययः विधीयते । तदनन्तरं व्युत्पन्नं पदं णमुलन्तं कृदन्ताव्ययं भवति । यथा :-

ध्यात्वा ध्यात्वा = ध्यायं ध्यायम् ।

पीत्वा पीत्वा = पायं पायम् ।

श्रुत्वा श्रुत्वा = श्रावं श्रावम् ।

दृष्ट्वा दृष्ट्वा = दर्शं दर्शम् ।

* * *

# समासः

द्वयोः पदयोः अथवा तदधिकपदानां वा अर्थानुगुणं संयोजनं समासः । समासः इति पदस्य सङ्क्षेपः इत्यर्थः । अर्थानुगुणम् एकीभूतं पदं समस्तपदम् । समस्तपदस्य अर्थविवरणं येन क्रियते तत् विग्रहवाक्यम् इति कथ्यते ।

**उदाहरणं यथा :**

| **समस्तपदम्** | **विग्रहवाक्यम् ।** |
|---|---|
| देशभक्तः । | देशस्य भक्तः । |
| गङ्गानदी । | गङ्गा इति नदी । |

समस्तपदे अथवा समासे यत्पदं प्रथमं उच्चार्यते तस्य पूर्वपदमिति, अनन्तरम् उच्चार्यमाणस्य पदस्य उत्तरपदमिति नाम । एतयोः पूर्वोत्तरपदयोः अर्थप्रधान्यस्याधारेण समासः चतुर्धा विभक्तः ।

**समासे चत्वारः भेदाः सन्ति ।**

१. तत्पुरुषसमासः । (राजपुरुषः) उत्तरपदार्थः प्रधानः ।

२. बहुव्रीहिसमासः । (पीताम्बरः) अन्यपदार्थः प्रधानः ।

३. द्वन्द्वसमासः । (रामलक्ष्मणौ) उभयपदार्थः प्रधानः ।

४. अव्ययीभावसमासः (प्रतिदिनम्) पूर्वपदार्थप्रधानः ।

### १. तत्पुरुषसमासः -

अस्मिन् समासे उत्तरपदस्य अर्थः प्रधानः भवति । अत्र पूर्वपदेन बोधितोऽर्थः गौण इत्यवगन्तव्यः। उदाः **दशरथस्य पुत्रः - दशरथपुत्रः** इत्यत्र **पुत्रः** इति पदस्य **दशरथस्य** इति पदं पूरकं भवति । समासेऽस्मिन् पूर्वोत्तरपदे विभिन्नविभक्तिम् आश्रयतः । पूर्वपदं प्रथमाविभक्तिं विहाय अन्यासु विभक्तिषु विद्यते । उत्तरपदं तु प्रथमाविभक्तावेव भवति । समास एषः पूर्वपदस्य विभक्तिमनुसरति । अतः विभक्त्यनुसारं प्रधानतया सप्त भेदाः । यथा प्रथमातत्पुरुषः, द्वितीयातत्पुरुषः, तृतीया तत्पुरुषः, चतुर्थी तत्परुषः, पञ्चमी तत्पुरुषः, षष्ठी तत्पुरुषः, सप्तमीतत्पुरुषः चेति ।

**उदाहरणानि :-**

| | **विग्रहवाक्यम्** | **समस्तपदम्** |
|---|---|---|
| **प्रथमा तत्पुरुषः** | पूर्वं कायस्य | पूर्वकायः |
| **द्वितीया तत्पुरुषः** | देवं श्रितः | देवश्रितः |
| **तृतीया तत्पुरुषः** | गुडेण मिश्रः | गुडमिश्रः |
| **चतुर्थी तत्पुरुषः** | गुरवे दक्षिणा | गुरुदक्षिणा |
| **पञ्चमी तत्पुरुषः** | चोरात् भयम् | चोरभयम् |
| **षष्ठी तत्पुरुषः** | कण्ठस्य आभरणम् | कण्ठाभरणम् |
| **सप्तमी तत्पुरुषः** | वने वासः | वनवासः |
| **नञ् तत्पुरुषः** | न धर्मः | अधर्मः |
| | न उत्तरा | अनुत्तरा |

प्रथमा तत्पुरुषस्य कर्मधारयसमासः इति व्यवहारः वर्तते, तत्र बहवोभेदाः ।

**नञ्तत्पुरुषः** - एषः तत्पुरुषस्यैव अन्यः भेदः वर्तते । यथा :-

न धर्मः - अधर्मः, (अत्र न कारस्य लोपो भवति)

न इच्छा - अनिच्छा इत्यादि । (उत्तरपदं यदि स्वरादि भवति तर्हि नुडागमः भवति ।)

**२. द्वन्द्वसमासः**

पूर्वोत्तरपदार्थयोः समानं प्रधान्यं चेत् सः द्वन्द्वसमासः भवति । यथा-बलरामकृष्णौ । **इतरेतरद्वन्द्वः समाहारद्वन्द्वश्चेति** समास एषः द्विविधः ।

उदाः **रामलक्ष्मणौ - रामश्च लक्ष्मणश्च** इति अस्य विग्रहवाक्यम् ।

**इतरेतरद्वन्द्वसमासे** प्रत्येकस्यापि पदार्थस्य प्रधानता वर्तते । समस्तपदस्य लिङ्गं विग्रहवाक्ये विद्यमानस्य अन्तिमपदस्य लिङ्गमेव भवति । समस्तपदस्य वचनं तु तत्र संयुक्तानां पदानां सङ्ख्याम्

अवलम्बते। अत्रोदाहरणे समासघटकपदे द्वे इति द्विवचनम्; लक्ष्मण इति पदं पुंलिङ्गम् इति समस्तपदस्य लिङ्गम् अपि पुंलिङ्गं भवति ।

उदाहरणान्तराणि यथा -

**वापीकूपतटाकानि** - वापी च कूपश्च तटाकं च ।

**तरुलते** - तरुश्च लता च ।

**रामलक्ष्मणभरतशत्रुघ्नाः** - रामश्च लक्ष्मणश्च भरतश्च शत्रुघ्नश्च

**मातापितरौ** - माता च पिता च ।

**समाहारद्वन्द्वे** समूहस्यैव प्राधान्यम् ।

उदाहरणानि -

**कौरवपाण्डवम्** - कौरवाश्च पाण्डवाश्च एतेषां समाहारः ।

**रथिकाश्वरोहम्** - रथिकाश्च अश्वारोहिणश्च एतेषां समाहारः ।

**पाणिपदम्** - पाणी च पादौ च एतेषां समाहारः ।

**समाहारद्वन्द्वे समस्तपदं सर्वदा नपुंसकलिङ्गे प्रथमाविभक्तौ एक वचने एव भवति।**

### ३. बहुव्रीहिसमासः

अन्यपदार्थप्रधानो **बहुव्रीहिः** । यथा, **पीताम्बरः - पीतम् अम्बरं यस्य सः** इति । अस्मिन् (पीतं) पूर्वपदस्य वा (अम्बरं) उत्तरपदस्य वा अर्थस्य प्राधान्यं न वर्तते । परं समस्तपदं (पीताम्बरः) कृष्णः इति अन्यार्थं सूचयति । एवं समस्तपदं अन्यस्य पदस्य विशेषणं भवति ।

**समानाधिकरणबहुव्रीहिः, व्यधिकरणबहुव्रीहिः** इति बहुव्रीहिः द्विविधः ।

समासान्तर्गतानां पूर्वोत्तरपदानां विभक्तिः समना चेत् समानाधिकरणबहुव्रीहिः। यथा- पीताम्बरः।

समासान्तर्गतानां पदानां विभक्तयः अर्थानुसारं भिन्नाः चेत् व्यधिकरणबहुव्रीहिः। चक्रपाणिः।

| **विग्रहवाक्यम्** | **समस्तपदम्** | |
|---|---|---|
| चत्वारि मुखानि यस्य सः | चतुर्मुखः | ब्रह्मा । |
| तपः एव धनं यस्य सः | तपोधनः | ऋषिः |
| कोदण्डः पाणौ यस्य सः | कोदण्डपाणिः | रामः |
| वीणा पाणौ यस्याः सा | वीणापाणी | सरस्वती |

✻ ✻ ✻

# अमरकोषसंग्रहः

| | | |
|---|---|---|
| स्वरव्ययं स्वर्गनाकत्रिदिवत्रिशालयाः । | : | ಸ್ವರ್ಗ |
| सुरलोकोद्यो दिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम् ।। | : | Heaven |
| अमरा निर्जरा देवाः त्रिदशा विबुधाः सुराः । | : | ದೇವತೆಗಳು |
| सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ।। | : | Gods |
| असुरादैत्यदैतेयदनुजेद्रारिदानवाः । | : | ರಾಕ್ಷಸರು |
| शुक्रशिष्या दितसुिताः पूर्वदेवास्सुरद्विषः।। | : | Demons |
| ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः । | : | ಬ್ರಹ್ಮ |
| हिरण्यगर्भो लोकेशः स्वयम्भूश्चतुराननः ।। | : | Brahma |
| विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः । | : | ವಿಷ್ಣು |
| दामोदरो हृषीकेषो केसवो माधवस्वभूः।। | : | Vishnu |
| लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया । | : | ಲಕ್ಷ್ಮೀ |
| इन्दिरा लोकमााता मा रमा मङ्गलदेवता ।। | : | Lakshmi |
| शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः । | : | ಶಿವ |
| ईश्वरः शर्व ईशानः शङ्करश्चन्द्रशेखरः ।। | : | Shiva |
| उमा कात्यायनी गौरी काली हैमवतीश्वरी । | : | ಗೌರೀ |
| शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला ।। | : | Gauri |
| विनायकोविघ्नराजद्वैमातुरगणाधिपाः । | : | ಗಣೇಶ |
| अप्येकादन्तहेरम्बलम्बोदरगजाननाः ।। | : | Ganesha |

| | | |
|---|---|---|
| द्योदिवौ द्वे स्त्रियामभ्रं व्योमपुष्करमम्बरम्। | : | ಆಕಾಶ |
| नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ।। | : | Sky |
| श्वसनः स्पर्शनोवायुः मातरिश्वा सदागतिः। | : | ಗಾಳಿ |
| पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः ।। | : | Air |
| अग्निर्वैश्वानरो वह्निः वीतिहोत्रो धनञ्जयः । | : | ಅಗ್ನಿ |
| हिरण्यरेता हुतभुक् दहनो हव्यवाहनः ।। | : | Agni, Fire |
| अभ्रं मेघो वारिवाहः स्तनयित्नुः बलाहकः । | : | ಮೋಡ |
| धाराधरो जलधरः तटित्वान् वारिदोऽम्बुभृत् ।। | : | Cloud |
| तडित् सौदामिनी विद्युत् चञ्चला चपला अपि । | : | ಮಿಂಚು-Lightning |
| हिमांशुः चन्द्रमाश्चन्द्रः इन्दुः कुमुदबान्धवः । | : | ಚಂದ್ರ |
| विधुस्सुधांशुश्शुभ्रांशुरोषधीशो निशापतिः ।। | : | Moon |
| भानुर्हंसः सहस्रांशुः तपनः सविता रविः । | : | ಸೂರ್ಯ |
| भास्कराहस्करब्रध्नप्रभाकरविभाकराः ।। | : | Sun |
| निशा निशीथिनी रात्रिः त्रियामा क्षणदा क्षपा । | : | ರಾತ್ರಿ |
| विभावरी तमस्विन्या रजनी यामिनी तमी ।। | : | Night |
| बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः । | : | ಬುದ್ಧಿ-Intellect |
| ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती । | : | ಭಾಷೆ-Language |
| शब्दो निनादनिनदध्वनिध्वानरवस्वनाः | : | ಶಬ್ದ |
| स्वाननिर्घोषनिर्ह्लादनादनिस्वाननिस्वनाः ।। | : | Sound |

| | | |
|---|---|---|
| उदन्वानुदधिः सिन्धुः सरस्वान् सागरोऽर्णवः । | : | ಸಮುದ್ರ |
| रत्नाकरा जलनिधिः यादःपतिरपांनिधिः ।। | : | Ocean |
| आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् । | : | ನೀರು |
